संस्कृतविद्यासमिति-पत्रिका

संस्कृतश्रीः

SAMSKRITASRI
A Monthly Journal of
Samskrit Education Society
தனி ப்ரதி
விலை ரூ. 4
APRIL & MAY 2020

ஸம்ஸ்க்ருதஶ்ரீ:
ஸம்ஸ்க்ருத கல்விக்
கழக மாத இதழ்
212/13-1,
செயின்ட் மேரீஸ் ரோடு,
மந்தைவெளி, சென்னை-28

संसारानलतापदूनहृदयान् संवीक्ष्य कारुण्यतो
हित्वा राजतपर्वतं परशिवः सन्त्रातुकामो नतान्।
कालट्यां समवाप्य मानुषतनुं श्रीशङ्कराख्यां शिवां
दीनान् क्षिप्रमतीतरद् गुरुगुरुः देवाय तस्मै नमः।।

ஸம்ஸாரமாகிய நெருப்பின் வெம்மையால் நொந்த உள்ளமுடைய அன்பர்களைக் கண்டு கருணையால் வெள்ளிமலையை விடுத்த சிவபெருமான் அவர்களைக் காப்பாற்றுவதற்காகக் காலடியில் ஸ்ரீசங்கரர் என்ற பெயரைப் பூண்டு மங்களமான மனித வடிவைத் தாங்கி தீனர்களைக் கரையேற்றினாரல்லவா, அத்தகைய குருமார்களுக்குக் குருவாகிய அந்தத் தெய்வத்துக்கு நமஸ்காரம்.

श्रीशङ्करभगवत्पादजयन्त्युत्सवः २८.०४.२०२०

உ

☎ 24951402

THE SAMSKRIT EDUCATION SOCIETY (Regd) MADRAS

Old 212/13-1, New No.11, St. Mary's Road, R.A. Puram, Chennai - 600 028.

Secretary & Treasurer : **Sri G. SITHARAMAN**, F.C.A.
Editor and Publisher : **Dr. S. SRINIVASA SARMA**
Associate Editor : **Dr. G. Sankaranarayanan**
Department of Sanskrit,
SCSVMV Univeristy, Enathur,
Kanchipuram, Tamilnadu
Cell : 99941 03957

1. ஸ்ரீமதி சாந்தா ஸ்ரீநிவாஸன், ஆழ்வார்ப்பேட்டை 98843 12214
2. ஸ்ரீமதி சாந்தி அசோக், மந்தைவெளி 24951402
3. ஸ்ரீமதி கௌரீ கருணாகரன், மைலாப்பூர், 24320544
4. ஸ்ரீமதி ரமாசுந்தரராஜன், சென்னை -95, 656876[illegible]
5. ஸ்ரீமத் பார்வதீ ராமசந்திரன் அண்ணா நகர் 26215719
6. ஸ்ரீ R. முத்து கிருஷ்ண ன் கொரட்டூர் 26872430
7. ஸ்ரீ S. ரங்கநாத சர்மா, சேலையூர் 22291720
8. ஸ்ரீமதி புவனேச்வரீ ராஜகீழ்பாக்கம் 9841212047
9. ஸ்ரீ K. ராஜேச்வரீ மாடம்பாக்கம் 99628373[illegible]
10. ஸ்ரீ S. ஹரிஹரன் நங்கைநல்லூர் 98414038[illegible]
11. ஸ்ரீ S. அனந்தன், மதுராந்தகம் 9894709418
12. ஸ்ரீ P.R. சுப்ரமண்யம், முகிலவாக்கம் 42649052
13. ஸ்ரீ R. ஸ்ரீநிவாஸகோபாலாசார்ய ஸ்ரீரங்கம் 2430632
14. ஸ்ரீமதி ராஜம் சுந்தர், திருநெல்வேலி 9488326850
15. ஸ்ரீ P.D. ஸ்ரீநிவாஸன், திருநின்றவூர் 9445703470
16. ஸ்ரீ R. ரங்கநாதன், காஞ்சீபுரம் 97910 55428
17. ஸ்ரீ C.A. ஏகாம்பரம், கோயம்புத்தூர் 0422-2233242
18. ஸ்ரீமதி டி.வி. ஜயலஷ்மி சர்மா, புன்குன்னம், த்ரிசூர்-680 002, 0487-2382964
19. ஸ்ரீமதி கௌரிவேங்கடராமன், காட்கோபர், Mumbai East 09757115154

ஸ்ரீ வி. கோதண்டராமன், Mrs. கீதா ரேகா,ஆதம்பாக்கம் 9444469638.

संस्कृतश्रीः

माला : ४२ APRIL 2020 पुष्पम् : ०४

कलि : ५१२२ शार्वरी - मेषमासः ४२-०४

The Samskrit Education Society Established with the blessings of His Holiness **SRI MAHASWAMIGAL** of Kanchi Kamakoti Peetam in the year 1957.

OFFICE:
Old 212/13-1, St.Mary's Road, Mandaiveli, Chennai – 600 028.

PRESENT ACTIVITES

1. Assisting study of Sanskrit.
2. Publication of books and monthly journal SAMSKRITASRI.

१. सम्पादकीयम्	४
२. बालीप्रत्यभिज्ञानशतकम्	५
३. रघुवंशम्	९
४. अष्टाङ्गहृदयम्	११
५. मन्त्रार्थचिन्तनम्	१४
६. तिरुक्कुरल्	१६
७. रूपकावली	१८
८. योगरहस्यम्	२०
९. श्रीकृष्णचरितम्	२३
१०. शास्त्रं ज्योतिःप्रकाशार्थम्	२६
११. श्रीमहास्वामिनां वचः	२९
१२. आदिशङ्करस्यानुभूत्यां मातृपितृगुरुदेवा	३३
१३. बालकथा	३६
१४. कालिदासकृतरघुवंशे स्त्रीणां वैशिष्ट्यम्	३८
१५. श्रव्यकाव्यभेदाः	४३
१६. पदरञ्जनी	४८

SUBSCRIPTION RATES

ANNUAL	: Rs. 40/-
LIFE SUBSCRIPTION	: Rs. 400/-
PAGE DONATION	: RS.200/-

Subscription and donations may be sent in the form of crossed D.D./Drawn in favour of the Secretary and Treasurer.

DD/Cheque should be sent by Speed Post only

The Samskrit Education Society (Regd.),
Old 212/13-1, St.Mary's Road, Mandaiveli, Chennai - 600 028.
Ph: 044 - 24951402 / Email: editorsamskritasri@gmail.com

सम्पादकीयम्

विकचविबुधमेधापद्ममाण्डयन्ती
रसिकहरिहृदब्जं नैजभासा सलीलम्।
रससुरुचिरतेजोराशिभिः काशयन्ती
जयतु भुवि नितान्तं संस्कृतश्रीः प्रसन्ना।।

सहायसाध्यं राजत्वं चक्रमेकं न वर्तत इत्याह कवितुल्यः प्रशमिताशेषराज्यशल्यः कौटल्यः। गणतन्त्रयन्त्रचक्रायिताः वयमेव राज्यस्य सहायभूताः। तत्रापि विशिष्यैतादृशदुर्घटनायां महामार्यभिभूतसमस्त-विश्वायामस्माकं कर्तव्यमिदानीं पुरतो विभाति। सर्वकारीययोजनासु योगदानं तथा तन्नियमानुवर्तनञ्चेदानीन्तनकर्तव्यम् अस्माकम्। वस्तुतो निरीक्ष्यमाणे धर्मशास्त्रोपदिष्टो मार्ग एवेदानीं नियमरूपेण सर्वकारेण विहितः। परस्परास्पर्शः, कासक्षुतादिषु मुखाच्छादनम्, पाणिपादप्रक्षालनम्, उच्छिष्टास्पर्शः, अस्थले निष्ठीववर्जनादिविषयाः धर्मशास्त्रोपदिष्टा एव विषयाः। तैरेवेदानीं महामारीनिवर्तनं भवतीति कथयन्ति विद्वांसः। अतः शास्त्राय च सुखाय चेति निर्दिष्टो मार्गः लोकक्षेमाय भवति।

एतद्देशप्रसूतस्य सकाशादग्रजन्मनः।
स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः।।

इति मनूक्तिः इदानीं पुरत इव परिलक्ष्यते। एते विषयाः न केवलं चित्तनिग्रहणाय अपि च शरीरसौष्ठावायाप्युपदिष्टा इत्ययं विषय उल्बणतयेदानीं ज्ञायते। अतः सर्वनियमरूपेण विहितान् शास्त्राचाराननुष्ठाय ऐहिकामुष्मिकश्रेयसे यतध्वमिति प्रार्थयते सम्पादकवर्गः।

बालीप्रत्यभिज्ञानशतकम्

Padmasri. ABHIRAJA RAJENDRA MISHRA
Formerly Vice-Chancellor, Varanasi

मध्यवर्तिवनालीषु व्याघ्रचित्रकरङ्कवः ।
रक्षितास्तत्र तिष्ठन्ति निर्भयारण्यनीवृति ।।११८।।

दृश्यते नु यवद्वीपं नेदिष्ठं सिन्धुपारगम् ।
गिलिमानुकसंस्थानात् यात्रापोतैर्निरन्तरम् ।।११९।।

द्वीपावुभौ प्रतीयेते केलिरोषपराङ्मुखौ ।
सोदराविव सुप्रीतौ गाढरागौ च युग्मजौ ।।१२०।।

गिलिमानुकसामीप्ये विद्रुमाणां शिलोच्चयः ।
अन्तर्निगूढ आधत्ते रक्तसिन्धुजलश्रियम् ।।१२१।।

प्राचेतसोऽथ वाल्मीकिस्तमेव लोहितोदधिम् ।
रामायणे ब्रवीत्येवं स्फुटमीक्ष्य मयोह्यते ।।१२२।।

दक्षिणोदधितीरेऽसौ राजमार्गः सुविस्तृतः ।
डेन्पसारपुरं यावत् निर्मितो गिलिमानुकात् ।।१२३।।

गिलिमानुकपूर्वस्थं क्रोशानां त्रिंशता पुनः ।
दूरे लसत्पुरं रम्यं नगराख्यं विराजते ।।१२४।।

जेम्बरानकमिश्नर्या मुख्यकेन्द्रमिदं शुभम् ।
वाटिकोद्यानचैत्यादिमण्डितं मञ्जुतोरणैः ।।१२५।।

जिम्बराणि वनान्यत्र जेम्बरानमिदं ततः ।
बीलीभाषाबलादेव शब्दतात्पर्यमुच्यते ।।१२६।।

नगरादग्निकोणस्थे पराञ्चाग्रामसीमनि।
राजते मन्दिरं रम्यं प्राक्तनं तटिनीतटे।।१२७।।

पुरापराञ्चेत्याख्याऽस्य स्थापितं व्राहडेन यत्।
महातान्त्रिकवर्येण राङ्गढाप्राणहारिणा।।१२८।।

राङ्गडाव्राहडद्वन्द्वं तंत्रशक्तिश्रितं मया।
रोचकं सदपि प्रत्नं विस्तरैर्न समुच्यते।।१२९।।

पुराराम्बुत् शिविर्नाम ततोऽन्यच्छिवमन्दिरम्।
सिन्धुकूलस्थितं रम्यं राजमार्गान्नु दृश्यते।।१३०।।

षोडशे शतके रव्रैस्ते बाटुरेङ्गङ्गनामनि।
नृपे शासति जावातो महातन्त्रविशारदः।।१३१।।

धर्माचार्यस्स नीरार्थो वउराहुरिति श्रुतः।
पा सुमेरुरिति ख्यातो डगह्यंगोऽथवा पुनः।।१३२।।

आमन्त्रितोऽथ बालीशैराजगामात्र नौकया।
हिन्दुधर्मव्यवस्थार्थं बालीद्वीपे मनुर्नवः।।१३३।।

बाल्यां संस्थापितं येन निराकारशिवार्चनम्।
तुरुष्का येन हिन्दूनां न कुर्युर्मूर्त्तिभञ्जनम्।।१३४।।

पुराराम्बुच्छिविप्रख्ये केशास्तस्यैव रक्षिताः।
मन्दिरं तेन सार्थाख्यं यतो राम्बुत्कचार्थकः।।१३५।।

अग्न एव तबानानं राम्बुच्छिविशिवालयात्।
एवमापूर्यते सम्यग् बालीद्वीपे परिक्रमा।।१३६।।

मध्येसमुद्रमेकाकि डेन्पसारपुरान्तिके।
मुख्यभूमिपृथग्भूतं द्वीपमेकं समीक्ष्यते।।१३७।।

ग्रामोऽसौ साकिनानाख्यो यत्र शाक्यानमन्दिरम्।
प्रख्यातं धूर्जटेः पीठं हिन्दुभिः परिपूजितम्।।१३८।।

समागतेऽथ विख्याते गलुङ्गानमहोत्सवे।
द्वीपान्तरागतैश्चापि हिन्दुभिः क्रियतेऽर्चनम्।।१३९।।

कियद्वा कथयिष्यामि ततोऽलं वर्ण्यविस्तरैः।
चुलुकैः पञ्चषैः पातुं जाह्नवी नैव शक्यते।।१४०।।

विदुषां सुहृदां तृप्त्यै प्रत्यभिज्ञानवर्णनम्।
बालीद्वीपानुरक्तानां मया संक्षिप्य दीयते।।१४१।।

भारते भारती माता त्रिवर्णध्वजवन्दिता।
राजते कोटिपुत्राऽसौ बाली तस्याश्च बालिका।।१४२।।

मातुः पुत्र्याः शरीरे द्वे एक आत्मा परं तयोः।
एक एवोभयोर्धर्मो न भिन्ना हिन्दुसंस्कृतिः।।१४३।।

मिश्रोऽभिराजराजेन्द्रो बाल्यामध्युष्य युक्समाः।।
कृतार्थं जीवनं स्वीयं मन्यतेऽचिन्त्य सेवया।।१४४।।

स्वस्त्यस्त्वितीव वाक्येन स्वागतं शान्तिवाचया।
विसर्जनं विधीयेते यत्र तस्यै भुवे नमः।।१४५।।

यदन्नजलवातैश्च पोषितोऽस्मि निरन्तरम्।
स्वर्गपर्यायभूतायै तस्यै बाल्यै नमो नमः।।१४६।।

विरिंगनतरुं वन्दे तपोधनसमश्रियम्।
यं दृष्ट्वैव हि जागर्ति श्रद्धा श्रद्धालुमानसे।।१४७।।

वन्दे वेणुवनं सान्द्रं बालीवैशिष्ट्यसूचकम्।
नारिकेलवनं वन्दे द्वीपोत्तमयशोध्वजम्।।१४८।।

धर्मभीरून् वचोभिश्च सुधामाधुर्यधायकान्।
शीलार्जवधरान् वन्दे सुहृदो बालिवासिनः।।१४९।।

प्रत्यभिज्ञानकाव्येन तदर्वाचीनसंस्कृतम्।
विश्राम्यति बुभूषुर्वै कविस्सम्प्रति सादरम्।।१५०।।

शरयुगगनदृगाख्ये विक्रमवर्षे शनौ च मध्याह्ने।
वदि चैत्रेऽह्नि तृतीये बाल्यां काव्यमिदं प्रपूर्णम्।।१५१।।

।। इति श्रीमदभिराजराजेन्द्रेण
बालीद्वीपस्थोदयनविश्वविद्यालयेऽतिथिप्राचार्यपदमधिरूढेन
दुर्गाप्रसादाभिराजीसूनुना विरचितं बालीप्रत्यभिज्ञानशतकं
परिपूर्णम्।।

भारतवाणी

योन्यथा सन्तमात्मानमन्यथा प्रतिपद्यते।
किं तेन न कृतं पापं चोरेणात्मापहारिणा।। १.६८.२६

எவனொருவன் தன் மனதில் இருப்பதற்கு
மாறான வகையில் தன்னை காண்பிக்கிறானோ
தன்னையே திருடிக்கொண்ட அந்தத் திருடன்
செய்யாத குற்றம்தான் என்ன?

रघुवंशम्

Sri. R.RANGANATHAN,
Sanskrit Education Society, Kanchipuram

द्वादशसर्गः एकाशीतितमः श्लोकः

अकाले बोधितो भ्रात्रा प्रियस्वप्नो वृथा भवान् ।
रामेषुभिरितीवासौ दीर्घनिद्रां प्रवेशितः ।।

पदच्छेदः

अकाले, बोधितः, भ्रात्रा, प्रियस्वप्नः, वृथा, भवान्, रामेषुभिः, इति, इव, असौ, दीर्घनिद्रां, प्रवेशितः ।।

शब्दरूपाणि

अकाले	-	अका. पुं. स. एक।
बोधितः, प्रियस्वप्नः, प्रवेशितः	-	रामशब्दवत्।
भ्रात्रा	-	ऋका. पुं. तृ. एक।
वृथा, इति, इव	-	अव्ययानि
भवान्	-	तका. पुं. प्र. एक।
रामेषुभिः	-	उका. पुं. तृ. बहु।
असौ	-	सका. पुं. प्र. एक।
दीर्घनिद्राम्	-	आका. स्त्री. द्वि. एक।

प्रतिपदार्थः

प्रियस्वप्नः - **தூக்கத்தில் விருப்பமுள்ள,** भवान् - **நீ,** वृथा - **வீணாக,** भ्रात्रा - **சகோதரனால்,** अकाले - **தகாதகாலத்தில்,** बोधितः- **எழுப்பப்பட்டாய்,** इति इव - **என்ற காரணத்தினால் போல்,** रामेषुभिः - **ராமரது அம்புகளால்,**

असौ - அவன், दीर्घनिद्रां - நெடுந்துயிலை, प्रवेशितः - அடைவிக்கப்பட்டான்

व्याकरणविशेषः

अकाले - न कालः अकालः, तस्मिन्।

प्रियस्वप्नः - प्रियः स्वप्नः यस्य सः।

रामेषुभिः - रामस्य इषवः। तैः।

दीर्घनिद्राम् - दीर्घा च सा निद्रा च। ताम्।

कोषः

निद्रा - स्यान्निद्रा शयनं स्वापः स्वप्नः संवेश इत्यपि।

दीर्घम् - सुदूरं दीर्घमायतम्।

इषुः - कलम्बमार्गणशराः पत्री रोप इषुर्द्वयोः।

भावार्थः

त्वदग्रजः इष्टनिद्रं त्वाम् असमये उत्थापितवान्। तस्मात् यथा त्वया दीर्घनिद्रा प्राप्यते तथा मया क्रियतेतिवत् रामः कुम्भकर्णं जघान।।

(अनुवर्तते.....)

भारतवाणी

क्रोधो हि धर्मं हरति यतीनां दुःखसञ्चितम्।
ततो धर्मविहीनानां गतिरिष्टा न विद्यते।। १.३८.८

துறவிகளாயிருந்து கஷ்டப்பட்டு சம்பாதித்த நல்வினையை சினம் அழித்து விடுகிறது. நல்வினை இல்லாதவர்களுக்கு விரும்பிய கதி உண்டாகாது.

अष्टाङ्गहृदयम्

Prof. S. SWAMINATHAN
Sri Jayendra Saraswathi Ayurveda College, Poonamallee

तीक्ष्णांशुरतितीक्ष्णांशुर्ग्रीष्मे संक्षिपतीव यत्।। २६
प्रत्यहं क्षीयते श्लेष्मा तेन वायुश्च वर्धते ।

यत् तीक्ष्णांशुः - யாதொரு காரணத்தால் சூரியன், ग्रीष्मेऽतितीक्ष्णांशुः - கோடையில் கடும் சூடான கதிர்களால், संक्षिपति इव - (உடலை) சுருக்கி முறுக்குகிறதோ என்று தோன்றும், तेन श्लेष्मा - அதன் காரணத்தால் (உடலில்) கபம் எனும் தோஷமானது, प्रत्यहं क्षीयते - தினம் தோறும் குறைந்து போகிறது. वायुः वर्धते च - வாதம் எனும் தோஷமானது, உடலில் வளர்ந்து விடுகிறது.

விளக்கம் - கோடையில் கபம் குறைந்து வாதம் வளர்ந்தாலும் அதற்குக் காரணமாக உஷ்ணாதிக்யம் என்பதால் குளிர்ந்த உபகாரங்களால் அதற்கு பரிகாரம் தேடவேண்டும்.

अतोऽस्मिन्पटुकट्वम्लव्यायामार्ककरांस्त्यजेत् ।। २७
भजेन्मधुरमेवान्नं लघु स्निग्धं हिमं द्रवम्।

अतः अस्मिन् - அதனால், இந்தக் கோடையில், पटुकटु अम्ल व्यायाम अर्ककरान् त्यजेत् - உப்பு, காரம், புளிப்புச் சுவைகளையும், தேகப் பயிற்சி, வெயிலில் செல்லுதல் போன்றவை தவிர்க்கவேண்டும். मधुरम् अन्नम् एव - இனிப்புச் சுவை அதிகம் அடங்கிய உணவையே, लघु स्निग्धं हिमं द्रवं

- எளிதில் செரிப்பதும், நெய்ப்புடன் கூடியதும், குளிர்ந்ததும், நீர்த் திரவமான வடிவத்திலும், भजेत् - உபயோகித்துக் கொள்ளவேண்டும்.

सुशीततोयसिक्ताङ्गो लिह्यात्सक्तून् सशर्करान् ।। २८
मद्यं न पेयं पेयं वा स्वल्पं सुबहुवारि वा ।
अन्यथा शोफशैथिल्यदाहमोहान् करोति तत् ।। २९
कुन्देन्दुधवलं शालिमश्नीयाज्जाङ्गलैः पलैः ।
पिबेद्रसं नातिघनं रसालां रागखाण्डवौ ।। ३०
पानकं पञ्चसारं वा नवमृद्भाजने स्थितम् ।
मोचचोचदलैर्युक्तं साम्लं मृन्मयशुक्तिभिः ।। ३१
पाटलावासितं चाम्भः सकर्पूरं सुशीतलम् ।
शशाङ्ककिरणान् भक्ष्यान् रजन्यां भक्षयन् पिबेत् ।। ३२
ससितं माहिषं क्षीरं चन्द्र नक्षत्रशीतलम् ।

सुशीततोयसिक्ताङ्गः - மிகவும் குளிர்ந்த நீரில் நீராடிவிட்டு, सशर्करान् सक्तून् लिह्यात् - சர்க்கரை சேர்த்த நெல்பொறிப் பொடியை நக்கிச் சாப்பிட வேண்டும். मद्यं न पेयं -மதுபானம் அருந்தக் கூடாது. स्वल्पं सुबहुवारि वा पेयं - மிகக் குறைந்த அளவிலோ, நிறைய தண்ணீர் கலந்தோ மதுபானம் அருந்தலாம். अन्यथा तत् - அப்படி அல்லாமல் மதுபானம் (அதிகம் அருந்தினால்), शोफशैथिल्यदाहमोहान् करोति - வீக்கம், பூட்டுகள் கலகலத்தல், எரிச்சல், குழப்பம் போன்றவை ஏற்படும். कुन्देन्दुधवलं शालिं - முல்லைப்பூ, சந்திரன் போன்று

வெண்மை நிறம் கொண்ட அரிசி அன்னத்தை, जाङ्गलैः पलैः अश्नीयात् - ஜாங்கலதேசத்தைச் சார்ந்த மிருகங்களின் மாமிசத்துடன் சாப்பிட வேண்டும்.

नातिघनं रसं - அதிகம் கொழுப்பில்லாத மாமிச சூப்பும், रसालं रागखाण्डवौ पिबेत् - ரஸாலம், ராகம், காண்டவம் எனும் பானகங்களையும் குடிக்கவேண்டும். मोचचोचफलैः युक्तं - வாழைப்பழமும், பலாப்பழமும் நறுக்கிச் சேர்த்து, नवमृद्भाजनस्थितं साम्लं - புதிய மண்பாத்திரத்தில் வைத்துப் புளிப்பாக்கி, मृण्मयशुक्तिभिः - மண்ணால் தயாரிக்கப்பட்ட பாத்திரத்தில் வைத்து, पञ्चसारं पानकं वा - பஞ்சசாரம் எனும் பானகமோ குடிக்கவேண்டும். पाटलावासितं - மாதிரிப்-பூவினுடைய நறுமணத்தை ஏற்றதும், सकर्पूरं - கற்பூரப்பொடி சேர்த்ததும், सुशीतलं अम्भः च - மிகவும் குளிர்ந்ததுமான தண்ணீரை அருந்தவேண்டும். शशांककिरणान् भक्ष्यान् - சசாங்ககிரணம் எனும் உணவுப்பொருளை, रजन्यां भक्षयेत् - இரவில் உண்ட பிறகு

ससितं - சர்க்கரை சேர்த்ததும், चन्द्रनक्षत्रशीतलं - சந்திரன் மற்றும் நட்சத்திரங்களின் கதிருகள் பட்டு குளிர்ந்ததுமான माहिषं क्षीरं पिबेत् - எருமைப்பாலை குடிக்க வேண்டும். **விளக்கம்** - பாலுடன் சர்க்கரை சேர்த்துக் கொதிக்கவிட்டுக் குறுக்கி கொழுக்கட்டை போலச் செய்து எடுப்பதற்கு **சசாங்ககிரணம்** என்று கூறப்படுகிறது.

(अनुवर्तते.....)

मन्त्रार्थचिन्तनम् - ३२

अग्ने! विश्वानि दुरितानि पारय!

Dr. M. JAYARAMAN

Krishnamacharya Yoga Mandiram, Chennai

अग्ने त्व पारया नव्यो अस्मान् स्वस्तिभिरति दुर्गाणि विश्वा।

पूश्च पृथ्वी बहुला न उर्वी भवा तोकाय तनयाय शंयोः।।

दुर्गासूक्तम् - महानारायणोपनिषत् प्रथमोनुवाकः

श्रीमत्सायणभाष्यानुसारी मन्त्रार्थः

हे अग्ने! स्तोतव्यः त्वं क्षेमकारिभिः उपायैः सर्वाः आपदः अतिशयेन लङ्घयित्वा, संसारस्य परतीरं नय।

त्वत्प्रसादात् अस्माकं निवासयोग्या पुरी विस्तीर्णा भवतु।

सर्वस्य निष्पादनयोग्या भूमिरपि बहुला भवतु।

त्वं च अस्मदपत्याय तदीयपुत्राय सुखस्य प्रदाता भव।

विवरणम्

कालेऽस्मिन् निखिलापि भूमिः कोरोनाख्य-विषाणुना ग्रस्ता बम्भ्रमीति। सर्वासु दिक्षु विद्यमानाः मानवाः रोगग्रस्ताः, रोगत्रस्ताः च सन्ति। कालेऽस्मिन् शौचमेव अस्मान् रक्षति इति बहुधा वार्तासु प्रचारमाध्यमेषु च अस्माभिः पठ्यते श्रूयते च।

शौचस्य प्रतीकम् अग्निः। अग्निः अत एव पावकः इति प्रशस्यते। पुनातीति पावकः।

अपावनानि सर्वाणि वह्निसंसर्गतः क्वचित्।

पावनानि भवन्त्येवतस्मात् स पावकः स्मृतः- इति

वाचस्पत्यकोशे स्कन्दपुराणकाशीखण्डोद्धरणमपि द्रष्टव्यम्।

अतः अग्निः प्रार्थनीयः, तं संस्मृत्य शौचाचारः पालनीयः। किञ्च, कालेऽस्मिन् विषाणुसंस्पर्शभीताः सर्वे सङ्कुचितसञ्चाराः सन्ति। निजगृहे एव वर्तन्ते। अतः वासार्थं भूमिः विशाला भवतु, रोगाणुनाशेन पुनरपि वाणिज्यहेतोः विद्याद्यर्जन-प्रसारण-हेतोश्च नानादेशसञ्चारसमर्थाः स्याम - इति मन्त्रेऽस्मिन् प्रार्थना द्योत्यते। अस्याः रोगबाधायाः कारणेन, कृषिक्षेत्रेषु, उद्यमकार्यागारेषु च मनुष्यप्रयत्नः कुण्ठितः, तेन सस्यादीनामपेक्षितानां वस्तूनां च निष्पत्तौ क्षतिः, तेन सर्वत्र वित्तीयहानिरपि प्रसक्ता अस्ति। तादृशी दुरवस्थापि निवारिता भवतु इत्यपि मन्त्रेणानेन प्रार्थ्यते कालानुगुण्येन।

अन्ते च, न केवलं वयं किन्तु अस्मदपत्यानि, तदीयापत्यानि च क्षेमं विन्दन्तु, समग्रमपि कुलं कुटुम्बं च परिरक्षितं भवतु इति प्रार्थना। भारतीया सनातनदृष्टिः **वसुधैव कुटुम्बकमिति** - तस्मात् जगति विद्यमानानां सर्वेषामपि क्षेमप्रार्थनेयमिति बोद्धव्यम् इति शम्।।

(अनुवर्तते.....)

भारतवाणी

शम एव यतीनां हि क्षमिणां सिद्धिकारकः।
क्षमावतामयं लोकः परश्चैव क्षमावताम्।। १.३८.९

பொறுமையுள்ள துறவிகளுக்கு புலனடக்கம் பயனளிக்கிறது. இம்மையும் மறுமையும் பொறுமையுள்ளவர்களுக்கே உண்டாகும்.

संस्कृतश्लोकानुरूपः - तिरुक्कुरल्

113. காதற் சிறப்புரைத்தல் - कामभूयस्त्वसंस्तुतिः

श्रीकलियन् रामानुजजीयर् (भूतपूर्वः),
नाङ्गुनेरि

பாலொடு தேன்கலந் தற்றே பணிமொழி
வாலெயிறு ஊறிய நீர்.
मुखे हि मृदुभाषिण्याः विशुभ्ररदनोदरात्।
उद्भिन्नं वारि दुग्धेन व्यामिश्रमधुवद्भवेत्।।

உடம்பொடு உயிரிடை என்னமற் றன்ன
மடந்தையொடு எம்மிடை நட்பு.
शरीरस्याऽऽत्मनश्चैव यावान्बन्धोऽस्ति तन्निभः।
समस्ति मैत्रीसंबन्धो विमुग्धाया ममापि च।।

கருமணியிற் பாவாய்நீ போதாயாம் வீழும்
திருநுதற்கு இல்லை இடம்.
याहीतः कर्हिचित्त्वं भोः! नेत्रपुत्तलिके! मम।
प्रियायास्सुललाटाया यतोऽत्राऽऽवसथं न हि।।

வாழ்தல் உயிர்க்கன்னள் ஆயிழை சாதல்
அதற்கன்னள் நீங்கு மிடத்து.
सुभूषणा मत्संश्लेषकाले विन्दति जीवनम्।
काले तु मद्वियोगस्य मृततुल्या भवत्यहो।।

உள்ளுவன் மன்யான் மறப்பின் மறப்பறியேன்
ஒள்ளமர்க் கண்ணாள் குணம்.
तेजस्वियुध्यमानाक्षिशोभिन्या गुणवैभवम्।
स्मरेयं विस्मृतिस्स्याच्चेन्नालं तद्विस्मृतावहम्।।

கண்உள்ளில் போகார் இமைப்பின் பருவரார்
நுண்ணியர்எம் காத லவர்.
मदीयलोचनान्तस्तो मत्प्रियः क्वापि न व्रजेत्।
अक्ष्णोर्निमीलने नापि दुःखं सूक्ष्मतया सखि!।।

கண்உள்ளார் காத லவராகக் கண்ணும்
எழுதேம் கரப்பாக்கு அறிந்து.
मन्नेत्रयुगलान्तर्यत्सदा वसति मत्प्रियः।
तत्तिरोधानभीत्याहं न करोम्यञ्जनाञ्जनम्।।

நெஞ்சத்தார் காத லவராக வெய்துண்டல்
அஞ்சுதும் வேபாக்கு அறிந்து.
अधितिष्ठति मत्प्रेयान् मदीयहृदयं सदा।
नाश्नाम्युष्णानि भोज्यानि बिभ्यती तस्य तापतः।।

இமைப்பின் கரப்பாக்கு அறிவல் அனைத்திற்கே
ஏதிலர் என்னும்இவ் வூர்.
अक्ष्यन्तरस्थप्रियस्यात्र तिरोधानभिया ह्यहम्।
न निद्राम्येष लोकस्तु निर्दयं वदति प्रियम्।।

உவந்துறைவர் உள்ளத்துள் என்றும் இகந்துறைவர்
ஏதிலர் என்னும்இவ் வூர்.
मच्चित्तान्तस्सदा प्रेम्णा निवासं कुरुते प्रियः।
निर्दयोऽयं प्रवासीति पुरी निन्दति मत्प्रियम्।।

(अनुवर्तते.....)

रूपकावली - नाचिकेतम्

Prof. VISHNU POTTY. V.S.
Kanchipuram

यमराजस्य राजधानी (द्वारपालस्तिष्ठति नचिकेताः आगत्य अञ्जलिं बद्ध्वा अभिवादयति)

द्वारपालः कस्त्वम्। कुत आगच्छसि।

नचिकेताः वाजस्रवसस्य पुत्रोऽहं नचिकेताः नाम। पितुराज्ञया यमराजं द्रष्टुमागतवानस्मि।

द्वारपालः किं स्वेच्छया आगन्तुं गन्तुं शक्यतेऽत्र।

नचिकेताः (अञ्जलिं बद्ध्वा) कृपया मार्गं ददातु। यमराजं द्रष्टुमिच्छामि।

द्वारपालः पूर्वानुमतिरस्ति वा।

नचिकेताः कथं भविष्यति।

द्वारपालः तर्हि कथं दर्शनमपि भविष्यति।

नचिकेताः प्रार्थयेऽहम्।

द्वारपालः प्रार्थनया अलम्। अत्रैव तिष्ठ। अन्तः गत्वा अनुमतिं गृहीत्वा आगच्छामि।
(अन्तः गत्वा पुनरायाति)
स्वामी कार्यान्तरे गतवानस्ति। अतस्तव अनुमतिर्नास्त्यन्तः प्रवेशाय।

नचिकेताः तर्हि प्रतीक्षां करवाणि।

द्वारपालः किमिदं पथिकानां विश्रान्तिस्थानम्।

नचिकेताः पार्श्वे तिष्ठामि।

द्वारपालः एवन्न। गच्छतु भवान्। बालोऽस्ति। बुभुक्षा पिपासा

च भवेताम्।

नचिकेताः अस्तु नाम।

द्वारपालः किं तव माता अस्ति वा अत्र। त्वां भोजयितुं पाययितुं वा।

नचिकेताः नाहमनित्ये अल्पे भोजने बुभुक्षुः। परं नित्ये अभोजने बुभुक्षुः।

द्वारपालः किं कुतर्कं करोषि। स्नेहात्पुनः कथयिष्यामि। प्रतिनिवर्तस्व इतः। गत्वा गृहं सुखेन वस। स्नेहेन पितरौ तव पालयिष्यतः।

नचिकेताः पितुराज्ञया आगतवानस्मि।

द्वारपालः तर्हि पिता अपि त्वादृशः किम्। पुनः उच्यते। गच्छ। अपि यावत्कालमन्नपानेन विना स्थास्यति। स्वामी कदा आगमिष्यति इति न जाने। किञ्चित्कालानन्तरं रोदिष्यति।

(सर्वे निष्क्रान्ताः)

(अनुवर्तते.....)

भारतवाणी

तस्माच्चरेथाः सततं क्षमाशीलो जितेन्द्रियः।
क्षमया प्राप्स्यसे लोकान्ब्रह्मणः समनन्तरान्।। १.३८.१०

எப்போதும் பொறுமையை விடாமல்
புலன்களை வசப்படுத்தி நடக்கக்கடவாய்.
பொறுமையினால் நான்முகனுக்கும் மேலான
உலகங்களை அடைவாய்.

योगरहस्यम् - ३२

Prof. S. VENUGOPALAN
SJSACH, Nazarathpet, Chennai

प्रत्ययस्य परचित्तज्ञानम् (पा.योग ३/१९) इति सूत्रार्थः चिन्तितः आसीत् गतपर्याये। तस्यैव विशेषः अधुना चिन्त्यतेऽधुना। अत्र विषये किञ्चित् वैशिष्ट्यं वर्तते ज्ञातुम्। एतत्पूर्वसूत्रे **संस्कारसाक्षात्करणात् पूर्वजातिज्ञानम्** (ibid ३/१८) इत्यत्र संस्कारसाक्षात्कारात् तदनुबन्धानामपि साक्षात्कारः तत्र संयमबलात् लब्धः। तथा च अनुभवक्लेशजाः स्मृतिक्लेशहेतवः इति ज्ञातम्। तथैव कर्मजाः सुखदुःखहेतवः इत्यपि। इमे द्वये संस्काराश्चित्तधर्माः पूर्वजन्मपरम्परासञ्चिताः विद्यन्ते। तेषु श्रुतेषु अनुमितेषु च संयमेन साक्षात्कृतेषु तद्धेतुत्वेन स्वीय - परकीय पूर्वजन्मपरम्परायाः साक्षात्कारो भवति। तत्र संस्कारसंयमात् पूर्वजन्मसाक्षात्कारः कथं लभ्यः इति न शङ्कनीयम्, सानुबन्धसंस्कारसंयमात् अनुबन्धत्वेन पूर्वजन्म-साक्षात्कारोत्पत्तेः सम्भवात् तत् समञ्जसम्। तद्वत् अत्रापि प्रकृते प्रत्ययस्य परचित्तज्ञानमित्यत्र परचित्तसाक्षात्कारात् तदालम्बनज्ञानं भवति वा? इति चेत् न इत्याह भगवान्। न (च) **तत् सालम्बनं तस्य अविषयीभूतत्त्वात्** (ibid ३/२०) इति सूत्रेण। तस्यायमर्थः अत्र परचित्तं मात्रं साक्षात्क्रियते। परं तत् सालम्बनं (सविषयं) तु न साक्षात्क्रियते। तस्य आलम्बनस्य अज्ञातत्वात्। तथा आलम्बनस्य ज्ञानार्थं किञ्चित् लिङ्गम् अपेक्ष्यते, लिङ्गादिना अज्ञाते संयमप्रवृत्तिः आलम्बनादिषु न सम्भवति। अतः तस्य परचित्तस्य आलम्बनविषये ज्ञानं नोत्पद्यते। ज्ञाने लिङ्गाद्यभावात् अविषयीक्रियमाणत्वात्। यदि विशेषयत्नेन परचित्तं ज्ञात्वा संयमेन साक्षात्कृतस्य इदानीं किमालम्बनमिति स्वचित्तं, प्रणिधत्ते योगी, तदा तत्कालीनमालम्बनम्

अवश्यं जानाति सः। तथा च एवमवगन्तव्यमिदम्- यदा परचित्ते स्वाभाविकतया रजोवृत्त्या तमोवृत्त्या वा जायमानाः रागद्वेषादयः तत्रत्यस्य संयमेन साक्षात्क्रियन्ते, तदा कस्मिन् विषये इमे रागद्वेषादयः जाताः इति तदानीं साक्षात्कारसमये न ज्ञायन्ते। तदर्थं विशेषप्रणिधावम् आवश्यकं वर्तते। तादृशे विशेषयत्ने कृते सति योगिनः तदपि ज्ञायते किंविषयकः अयं रागद्वेषादिः अनेन (परेण जनेन) चित्ते अनुभूयते इति। एवमेव सिद्ध्यन्तरमपि आह भगवानत्र। तद्यथा - **कायरूपसंयमात् ग्राह्यशक्तिस्तम्भे चक्षुःप्रकाशासंयोगे अन्तर्धानम्** (ibid ३/२१) इति, तथा चायमर्थः, कायो नाम शरीरम् **चीयते अन्नादिभिः अस्थ्यादिकम् इति व्युत्पत्त्या कायशब्दः (चोः कुः** (पा.सू. ८.२.३०) इति सूत्रेण चिञ्चयने धातोः घञि निष्पन्नः शब्दः) तस्य रूपं चक्षुमत्रिग्राह्यो गुणः, तस्मिन् रूपे (स्वस्थूलशरीरस्य यद्रूपं तत्र) संयमदार्ढ्येण तस्य रूपस्य चक्षुर्ग्राह्यत्वरूपा या शक्तिः तस्याः स्तम्भनात् तन्नाम भावनावशात् प्रतिबन्धे चक्षुः प्रकाशासंयोगे तन्नाम चक्षुषः प्रकाशः सत्त्वधर्मः तस्य असंयोगे, तद्ग्रहणव्यापाराभावे योगिनः अन्तर्धानं सम्भवति, न केनचित् असौ योगी दृश्यते इत्यर्थः। अन्यथा निरूपणीयं चेदेवं स्यात्, स्वशरीरस्य रूपे संयमात् कारणाद्यशेषविशेषैः साक्षात्कृते सत्यपि सङ्कल्पमात्रेण स्वकीयरूपस्य दृश्यताशक्तिं, तन्नाम परचक्षुःसंयोगयोग्यतां स्तभ्नाति योगी। ततः चक्षुः किरणैः असंयोगे अन्तर्धानं योगिनः उत्पद्यते। दिवान्धेन इव केनाप्यसौ न दृश्यते, कस्यापि दृष्टिगोचरो न भवति। एतेन रूपे संयमात् चक्षुरग्राह्यत्वोपलक्षितेन शब्दादीनामपि विषये संयमात् तेषामप्यन्तर्धानमुक्तम् इति वेदितव्यम्। पुराणेषु देवतानामयं स्वभावः इति दृष्टवतामस्माकं सद्यः मानवानामपि योगित्वम् सम्पादितवतां

विशिष्टानामपि अयं स्वभावो भवितुमर्हतीति ज्ञायते अनेन सूत्रेण। द्राविड्यां सूक्तिः एवमस्ति, வையத்துள் வாழ்வாங்கு வாழ்வார், வானுறையும் தெய்வத்துள் வைக்கப்படும் इति। तथा च भूमौ यः स्वीयं जीवनं योगमार्गेण प्रवर्तयति, सः दिविस्थैःदेवैः तुल्यतां याति इति तत्रोच्यते। तेन देवतुल्याः इमे योगिनः देवतानां सर्वविधमैश्वर्यं भूमावेव सम्पादयन्ति इति ज्ञातुं शक्यते।।

(अनुवर्तते.....)

FORM IV (See rule 8)

1.	Place of Publication	: Chennai - 600 018
2.	Periodicity of its publication	: Monthly
3.	Printer's Name (Whether citizen of India Address	: D. Senthilkumar Indian : ZIGMA GRAPHICS : 9/1, Sitarappan Street, Triplicane, Chennai-5
4.	Publisher's Name	: SRI S. SRINIVASA SARMA Plot No. 337, Muthiah Nagar Annamalai Nagar, Chindambaram - 608 002
5.	Editor's Name Whether citizen of India Address	: SRI S. SRINIVASA SARMA : Indian : Plot No. 337, Muthiah Nagar Annamalai Nagar, Chindambaram - 608 002
6.	Name and address of Society who own the newspaper	: **The Samskrit Education Society** : Old 212/13-1, St. Mary's Rd. R.A. Puram, Chennai-600 028

I Sri S. Srinivasa Sarma hereby declare that the particulars given above are true to the best of my knowledge and belief.

Date : 1-3-2020

Sd—

SRI S. SRINIVASA SARMA

Signature of Pubisher

कलिकल्मषघ्नं श्रीकृष्णचरितम् - ९

(वसुदेववचनेन देवक्याः वधोद्योगात्कंसस्य निवृत्तिः, देवकीपुत्राणां कंससकर्तृको वधश्च)

Dr. M. VINOTH
French Institute of Pondicherry,

पूर्वसञ्चिकायां भगवतः श्रीकृष्णस्य जन्म, वसुदेवेन गोकुलं प्रति स्वपुत्रस्य नयनम्, गोकुलात् यशोदासुतायाः आनयनम् इत्याद्याः घटनाः अस्माभिरनुभूताः। अस्यां मायादेव्याः मायालीलादिकं पश्यामः। एवं यशोदासुताम् आनीय देवक्याः पार्श्वे स्थापितवान् वसुदेवः। ततः सर्वाण्यपि द्वाराणि पूर्ववदावृतानि। तदनन्तरं जातस्य शिशोः ध्वनिं श्रुत्वा तत्रत्याः द्वारपालकाः देवक्याः गर्भात् जायामानात् शिशोः भीतस्य कंसस्य समीपं गत्वा शिशोः जन्म विषये ऊचुः। तच्छ्रुत्वा कंसोऽपि अयमेव काल इति विचिन्त्य शयनादुत्थाय मुक्तमूर्धजस्सन् सूतिकागृहं प्राप्तवान्। तथागतं कंसं दृष्ट्वा देवकी - हे भ्रातः, इयं तव स्नुषा भवति। स्त्रीत्वाद् इयं वधानर्हा भवति। भवान् अशरीरिण्याः वचनं श्रुत्वा अस्याः पूर्वं जातान् सर्वान् मत्पुत्रान् जघान। तव अवरजायै मन्दभाग्यवत्यै मह्यम् इमामेकां बालां प्रयच्छ इति प्रार्थितवती। एवं भुजेन शिशुम् उपगुह्य प्रार्थयन्तीं तां देवकीं विनिर्भर्त्स्र्य तस्याः हस्तात् शिशुम् आचिच्छेद। जातमात्रां तां स्वसुः सुतां चरणयोः गृहीत्वा सः क्रूरः कंसः शिलायाम् अपोथयत् (बलेन चिक्षेप)। परं श्रीविष्णोः मायारूपिणी सा देवी तस्य कंसस्य हस्तात् समुत्पत्य अम्बरं गता। अष्टभुजा सिद्धचारणगन्धर्वैः अप्सरःकिन्नरोरगैश्च स्तूयमाना शङ्खचक्रगदाधरा रत्नाभरणभूषिता विष्णोः अनुजा सा मायादेवी दुष्टं कंसं दृष्ट्वा - हे मूढ, मम हनने किं वा प्रयोजनम्, तव

अन्तकृन्नाम तव नाशकृत् क्वचित्प्रदेशे जात एव। इतः ऊर्ध्वं जायमानान् शिशून् मा हिंसीः। तेन किमपि प्रयोजनं नास्ति इत्युवाच। एवं तम् उक्त्वा सा देवी भगवती माया भुवि नानानामभिः पूजां प्राप। कंसोऽपि योगमायायाः वचःश्रुत्वा विस्मितो भूत्वा देवकीं वसुदेवञ्च कारागृहात् विमुच्य प्रश्रितस्सन् -

अहो भगिन्यहो भाम मया वा बत पाप्मना।
पुरुषाद इवापत्यं बहवो हिंसिताः सुताः।।

(श्रीमद्भागवतम्, १०.४.१५)

इत्येवम् आरभ्य एवमुवाच - अहो मम भगिनि, अहो मे भाम, अहं भवतां सुतान् सर्वान् हिंसां कृत्वा पापिष्ठोऽभवम्। करुणां विना बन्धून् मित्रान् च त्यक्त्वा भवन्तमपि हिंसां कृत्वा भवतां पुत्रानपि जघान। कीदृशः पापिष्ठोऽहम्, किं लोकं वा आप्नुयाम्। केवलं स्थावरजन्म एव लभेय। अहं ब्रह्महा इव (ब्रह्महत्यां कृतवानिव) जीवन्नपि मृत एव। पूर्वं दैवमवोचत् यदस्याः (देवक्याः) अष्टमो गर्भः भवतः हन्ता इति। अधुना तदेव वदति यत् मम नाशकृत् क्वचित्प्रदेशे जात इति। अतः मनुष्यवत् दैवमपि अनृतं वक्ति। एतस्य देवस्य वचः श्रुत्वैव खलु अहं मम भगिन्याः पुत्रान् हत्वा पापिष्ठोऽभवम्। हे महाभागौ (देवकीं वसुदेवञ्च संबोधयति), मृतान् तव शिशून् उद्दिश्य चिन्तां मा कृषाताम्। स्वकर्मवशात्ते मरणम् आप्नुवन्। स्वकर्मफलानि स्वेनैव खलु भोक्तव्यानि। तस्मात् जन्तवः स्वकर्मणां दैववशानुगुणं प्रेषिताः सन्तः सर्वकालेषु एकत्रैव सन्निहिताः न भवन्ति। कर्मानुगुणभूते जन्ममरणे आप्नुवन्ति। किञ्च -

भुवि भौमानि भूतानि यथा यान्त्यपयान्ति च।
नायमात्मा तथैतेषु विपर्येति यथैव भूः।।

(श्रीमद्भागवतम्, १०.४.१९)

इत्येवमुक्त्वा यथा भुवि भौमानि यान्ति पुनरायान्ति च तथैव अयमात्मा अपि स्वकर्मवशानुगुणम् उपरि यान्ति पुनरायान्ति च। नैतावता, अपि च भूतानां परिणामरूपमिदं शरीरं जन्ममरणादिविकारान् प्राप्नोति चेदपि एतस्य धारकः यः आत्मा स एक एव। देहस्यैव जन्ममरणादिविकाराः भवन्ति इत्यस्मात् शोचं न कुरुतः। आत्मनः विकार एव नास्ति नित्य एव स इत्यस्माच्च शोकः न कर्तव्यः। एवं देहस्य आत्मनः च विद्यमानं भेदम् अज्ञात्वा शरीरमेव आत्मा इति मूढाः भ्रमन्ति। यावता स च भ्रमः न दूरीभवति तावता तद्भ्रमयुक्तात् संसारादपि तेषां मोक्षः नास्त्येव। किञ्च यावत् हतोऽस्मि, हन्ताऽस्मि इति देहात्मभ्रान्त्या आत्मानम् अभिमन्यते तावदेव तदभिमानी अज्ञस्सन् बाध्यबाधकतां प्राप्नुयात्। हे दीनवत्सलाः, साधवः, मम दौरात्म्यं क्षमध्वम् इत्युक्त्वा श्यालः कंसः स्वस्रोः पादौ अग्रहीत्। एवमुक्त्वा सौहार्दञ्च दर्शयन् सः कंसः देवकीं वसुदेवञ्च तस्मात् कारागृहात् विमोचयामास। पश्चात्तप्तं भ्रातरं क्षमां कृत्वा देवकी रोषं व्यसृजत्। तथा वसुदेवोऽपि क्षान्त्वा प्रहस्य कंसं दृष्ट्वा - हे महाभाग, यत्किमपि भवता उक्तं तत्सत्यमेव। किञ्च मम वचनमपि श्रूयताम्। देहिनाम् इयम् अहंधीः अज्ञानप्रभवा भवति नाम देहात्मभ्रमजा भवति। सा च धीः जन्तून् पृथक्दृशः करोति। तेनैव कारणेन शोकादिभिः भावैः पीडितस्सन्तः जन्तवः ईश्वरं न पश्यन्ति। किन्तु केवलं स्वपरभेदमेव पश्यन्ति इत्येवम् उवाच। एवं ताभ्यां प्रसन्नाभ्यां देवकीवसुदेवाभ्याम् अनुज्ञातः कंसः स्वगृहम् अविशत्।।

(अनुवर्तते.....)

शास्त्रं ज्योतिः प्रकाशार्थम् - १६

Ms. DHWANI J.
IV BAMS, Sri Jayendra Saraswathi Ayurveda College, Chennai

नमः संस्कृतसेवकेभ्यः! गतमासे जलस्य कलुषता विषये चर्चयित्वाऽस्माभिः विरामः कृतः। जलन्तु खलु प्रदुष्टवायुना प्रदुष्टमृदादिभिर्वा दुष्यत्येव, तदतिरिच्य वयमपु मनुष्याः जलप्रदूषणरता एव स्मः। एवं सति जलस्य शोधनं विना तत्सेवनं तु असाधु, असाध्यमेव च भाति। प्रायः पञ्चाशद्वर्षेभ्यः प्राक् जनाः नलिकायाः एव जलं पिबन्तः आसन्। परमद्यत्वे तादृशः अभ्यासः रोगानेव जनयेत्। अतः अनिवार्यमिदं जलशोधनकर्म अधुना आयुर्वेदरीत्या विचारयामः।

व्यापन्नस्य चाग्निक्कथनं सूर्यातपप्रतापनं तप्तायःपिण्डसिकतालोष्ट्राणां वा निर्वापणं प्रसादनं च कर्तव्यं नागचम्पकोत्पलपाटलपुष्पप्रभृतिभिश्चाधिवासनमिति। (सुश्रुतसंहिता - सूत्रस्थानम् - ४५.१२)

व्यापन्नस्य प्रदुष्टस्य जलस्य। अग्निक्कथनं जलस्य अग्नावुपरि स्थापनेन बुद्बुदनम्। सूर्यातपप्रतपनं जलस्य सूर्यांशुस्पर्शेन उष्णीकरणं शुद्धीकरणं च। तप्तायःपिण्डसिकतालोष्ट्राणां वा निर्वापणमिति अग्निना तप्तानां लोहपिण्डमृत्पिण्डादीनां सकृत् जले स्नपनम्। एवं अग्निक्कथनादिभिः जलस्य प्रसादनं कर्तव्यमिति। तत्र **अग्निक्कथनं महादोषदुष्टस्य, सूर्यातपप्रतापनमल्पदोषे, तप्तायःपिण्डादिनिर्वापणं मध्यदोषे** इति व्याख्याकारेण डल्हणाचार्य्येण स्पष्टीक्रियते। नागकेसरादिद्रव्याणां जले अधिवासनं संस्थापनं चाग्रे उक्तं जलशोधनार्थम्। अग्रे, सुश्रुताचार्य्येण सप्त कलुषस्य जलस्य प्रसादकानि द्रव्याणि उक्तानि। तद्यथा - **कतकगोमेदकबिसग्रन्थिशैवालमूलवस्त्राणि मुक्तामणिश्चेति।** तत्र

कतकं शशकपुरीषप्रतिमं फलमिति डल्हणाचार्य्यवर्णनम्। तच्च संप्रति लेटिन्भाषायां स्ट्रिक्नस् पोटेटोरम् (Strychnos potatorum) इति ज्ञायते। तमिळभाषायामस्य तेट्रा (தேற்றா), तेत्ता (தேத்தா), इल्लम् (இல்லம்), तेत्ताङ्कोट्टै (தேத்தாங்கொட்டை), तेरु (தேறு) इत्यादीनि नामानि।

गोमेदकः पुष्परागाभो मणिः। तस्य अगेट् (Agate) इति आङ्ग्लभाषायां,- तमिळभाषायामपि गोमेदकमिति नाम्नैव ज्ञायते।

बिसग्रन्थिः पद्ममूलम्। तच्च नेलुम्बो न्युसिफेरा (Nelumbo nucifera) (लोटस् (Lotus)) इत्यस्य मूलं भवति (तामरैक्किषङ्गु (தாமரைக்கிழங்கு) इति तमिल्भाषायाम्)।

शैवालम् च वैवेस् पेनरोमा (Vivace panorama), तमिळभाषायां पासी (பாசி) इत्युच्यते।

मुक्ता मौक्तिकं पर्ल् (Pearl) इति आङ्गलभाषायां, मुत्तु (முத்து) इति तमिळभाषायां चोच्यते।

मणिः स्फटिकादिः इति डल्हणः। स्फटिकं नाम पोटेश् एलम् (Potash alum), पडिगारम् (படிகாரம்) इति तमिळभाषायां ज्ञायते।

एतानि द्रव्याणि जले संस्थापितानि कालुष्यं हरन्तीत्यर्थः। अग्रे, सुशोधितं जलं कीदृक्षु पात्रेषु स्थापनीयमिति विचार्यम्। प्लास्टिक् तु सर्वशो निन्द्यमिति ज्ञायत एव सर्वैः, अतस्तद्धयेत्वं न विव्रियते। उच्यते-

सौवर्णे राजते ताम्रे कांस्ये मणिमयेऽपि वा।
पुष्पावतंसं भौमे वा सुगन्धि सलिलं पिबेत्।।

(सुश्रुतसंहिता - सूत्रस्थानम् - ४५.१३)

सुवर्णरजतताम्रकांस्यमणिमयपात्राणि उक्तानि। एषु ताम्रपात्रं कांस्यपात्रं च प्रायः साध्यमेव स्यात्। भौमं तु मृण्मयम्, अद्यत्वे शक्यतमं

स्यात्। पुष्पावतंसं पुष्पसुगन्धीकृतम्।

अधुना, पात्रमिदं कुत्र स्थापनीयमिति विचार्यम्। ननु शोधतं जलं सुष्ठु पात्रे स्थापयित्वा कलुषस्थाने स्थापयामश्चेत् सर्वोऽप्ययं प्रयत्नः अपार्थकः एव सञ्जायेत। तत्रोच्यते - **पञ्च निक्षेपणानि भवन्ति तद्यथा- फलकं, त्र्यष्टकं, मुञ्जवलय, उदकमञ्चिका, शिक्यं चेति** (सुश्रुतसंहिता - सूत्रस्थानम् ४५.१८)

अत्र डल्हणव्याख्यां पश्यामः - **निक्षेपणं यत्र जलं निक्षिप्यते स्थाप्यते। फलकं शाल्मलीकाष्ठादिविरचितं, त्र्यष्टकम् अष्टास्रदण्डत्रयसंयोगः, मुञ्जवलयो मुञ्जादिविरचितो वलयाकारः, उदकमञ्चिका आकाशान्तराले निरन्तरनिहितवेत्रवेण्वादिविरचिता वेत्रगृहाद्यभिधाना, शिक्यं मुञ्जादिविरचितं प्रसिद्धम्।** चरमतया शुद्धजलगुणाः उच्यन्ते -

निर्गन्धमव्यक्तरसं तृष्णाघ्नं शुचि शीतलम्।
अच्छं लघु च हृद्यं च तोयं गुणवदुच्यते।।

(सुश्रुतसंहिता - सूत्रस्थानम् - ४५.२०)

निर्गन्धं गन्धरहितम्। अव्यक्तरसं तिक्तत्वादिवर्जितम्। तृष्णाघ्नं पिपासाशमनसमर्थम्। शुचि शुद्धम्। शीतलं शरीरोष्णत्वशमनसमर्थम्। अच्छं रजोराज्यादिरहितम्। लघु जरणसुखम्। हृद्यं हृदयाय हितं मनःप्रसादकं वा। ईदृशमेव जलं गुणवत् गुणयुक्तमुच्यते। सर्वमेतदुक्त्वाऽपि एतदुच्यते - संप्रति लोके बहुविधं प्राणघातकमपि प्रदूषणं सञ्जायमानं भवति जले। अतः सर्वमेतत्कृत्वाऽपि जलशौचं सुष्ठु परीक्ष्यैव प्रयोगः कर्तव्यः इति। यतो हि शुद्धाशुद्धजलेन खलु स्वास्थ्यास्वास्थ्यं भवति लोके! आगामिमासे पुनरपरं विषयं स्वीकृत्य विचारयामः।

(अनुवर्तते.....)

अष्टौ गुणाः எட்டு குணங்கள்

(श्रीमहास्वामिनां वचःसमुद्धरणपूर्वकम्)

Dr. S. THIAGARAJAN
Department of Oriental Studies & Research,
SASTRA - Deemed to be Unviersity, Thanjavur

दया, क्षान्तिः, अनसूया, शौचम्, अनायासः, मङ्गलम्, अकार्पण्यम्, अस्पृहा इत्येवम् अष्टौ गुणाः भवन्ति। दया नाम सर्वेष्वपि भूतेषु प्रियं, कारुण्यम्। मनुष्यजीवनस्य फलं महदानन्दं च प्रीतिसंप्रदर्शनमेव। तदेवाधारभूतमस्ति। क्षान्तिः इत्युक्ते सहनशीलता। व्याधि-विपत्-दारिद्र्यादिभिः अस्माभिः अनुभूयमानानामपि कष्टानां (दुःखानाम्) सहनमेकम्। कष्टदातारमपि क्षान्त्वा तस्मिन् प्रेमभावप्रदर्शनमपि काचन क्षान्तिरेव। अनसूया इत्युक्ते अत्रिमहर्षेः पत्नीति ज्ञायमाना महापतिव्रता। असूया रहिता अनसूया। (अनुसूया इति नकारस्य स्थाने नुकारमुपयुज्य यदुच्यते तन्न युक्तम्।) अस्मदपेक्षया कश्चन उत्तमस्थितौ भवति चेत् असूया न करणीया। ईर्ष्यारहितता एव अनसूया।

आदौ प्रोक्तं प्रेमदर्शनं सर्वेष्वपि; अपरा या प्रोक्ता क्षान्तिः इति तद् अस्मत्सु विरोधप्रदर्शनेषु; अनसूया इति अस्मदपेक्षया उन्नतस्थाने विद्यमानेषु च आचरणीयम्। सः अस्मदपेक्षया योग्यताहीनः भवति चेदपि अस्मदपेक्षया उत्तमं स्थानं प्राप्तवानित्यतः असूया न करणीया। पूर्वस्मिन् जन्मनि सः अस्मदपेक्षया अधिकं पुण्यं कृतवान् । अत एव भगवान् तम् उन्नते स्थाने स्थापितवान् इति मनःपक्वतया भाव्यम्। शौचमिति पदं शुचि इति पदस्याधारेण निष्पन्नम्। शुचिरित्युक्ते शुद्धता। स्नानं, शौचवस्त्रम्, आहारनियमः इत्यादयः आचारनियमाः सर्वे शौचमित्यत्रैवान्तर्भवन्ति। **शुद्धता सुखं यच्छति, शुद्धता भोजनदा** इत्येवं पामरजनाः अपि वदन्ति। बाह्यशुद्धं पश्यामश्चेदेव अस्मन्मनसः

अपि शुद्धिः भवति। सकलजन्तुभ्यः पञ्चधर्मान् मनुः उपदिशति। तत्रापि आदौ अहिंसा ततः सत्यम्, अनन्तरं परेषां वस्तुनि आशारहितता (अस्तेयम् - अचौर्यकरणमिति वस्तुतोऽर्थः) इति त्रीन् धर्मान् उक्त्वा चतुर्थमिदं शौचमेव वदति। अन्ते च इन्द्रियनिग्रहं वदति। अनायास इत्येषः आत्मगुणेषु अपरः। आयासस्य विपरीतं पदम् अनायास इति। लघु भवति इति वदन्ति खलु स एव अनायासः। आयासेन विना अर्थात् यत्किमपि भारमिति विचिन्त्य कष्टं नानुभवन् लाघवेन भारेण विना यः भावः सः अनायासः इति। सर्वदा उर्-रिति (உர்ரென்று) भूत्वा जीवने मह्यं सर्वमपि कष्टमिति न जल्पन् आत्मानमनिन्दन् सर्वत्र काठिन्यं नाचरन् सावकाशं लाघवेन कार्यं करणीयम्। एवं करणेनैव आयासेन क्रियमाणात् कार्यादपेक्षया बहुगुणं कार्यं कर्तुं शक्यते।

संभ्रमेण विना कार्यकरणम् अनायासः इति। संभ्रमेण कार्यकरणेन आत्मनः परस्य च क्लेशः एव भवति कार्यसंपादनं न भवति। अनायासः कश्चन महान् गुणः। दर्पहीनः (द्रविडे அலட்டிக்கொள்ளுதல் இல்லாமை) स्वभावः अनायासः। परेभ्यः श्रमम् अदत्वा स्वयं च श्रमं विना यथा भूयते स एव अनायासः। नैकेषु कर्मानुष्ठानेषु शरीरेण श्रमः कर्तव्य एव। श्राद्धकर्मवेलायां मध्याह्ने द्विवादनपर्यन्तं वा त्रिवादनपर्यन्तं वा नूनम् उपवासेन भाव्यमेव। (एवमेव) यागकर्मसु विद्यमानाः श्रमाः नैकाः भवन्ति (एव)। एवञ्च प्रकृते श्रमं विना इत्युक्ते मनसा श्रमं विना इत्यर्थः। यत्किमपि वा कर्म भवतु नूनं विघ्नाः भवन्ति एव तान् (विघ्नान्) दृष्ट्वा मनसः श्रमः न कर्तव्यः। सर्वं भगवता सङ्कल्पेन चलति इति मनसि भारं विना भाव्यम्। सङ्गीतविद्वान् अनायासेन तारस्थायिनम् गृहीतवान् इत्युक्ते कोऽर्थः? श्रमसाध्यमेव सुलभञ्चकार इत्येव खलु अर्थः। श्रमरूपं जीवनं तथा (सुसाध्यम्) करणमेव अनायासः।

मङ्गलमित्युक्ते मङ्गलमेव। आनन्देन - तत्रैव गाम्भीर्येण, शौचेन च आनन्देन भवनमेव मङ्गलम्। सर्वदा कटुतया, परुषतया च न भूत्वा आः इति सर्वदा सन्तोषेण भाव्यम्। इदमेव लोकस्य कृते अस्माभिः क्रियमाणः कश्चन महानुपकारः, सेवाभावः। भूरिधनदानापेक्षया अन्यत्सेवाकरणापेक्षया च वयं यत्र यत्र गच्छामः तत्र तत्र मङ्गलेन आनन्दनमुद्भावयामश्चेत् तदेव इतरेषां जीवानां कृते क्रियमाणा महत्सेवा भवति। (Lite भूत्वा) लाघवेन कार्यसाधनमनायासः। वयं यत्र भवामः तत्र Light (दीपः) इव प्रकाशम्, आनन्दं दद्मश्चेत् तदेव मङ्गलम्। वयम् एकत्र गच्छामश्चेत् तत्रस्थाः दोषम् अन्वेष्टुम् आगतवान् इति पराङ्मुखं न कुर्युः। तथा भाव्यम्। यत्र क्वापि वयं गच्छामः तत्र समीचीनरूपेण सन्तोषवृद्धिं कुर्यास्म। वयमपि मङ्गलरूपेण भूत्वा, उद्भूयमानं मङ्गलं च सर्वत्र प्रसारणीयमस्माभिः।

अकार्पण्यमिति अन्यत् अवदम्। कृपणस्य गुणः कार्पण्यम्। तस्याभावः अकार्पण्यम्। कृपणः इत्युक्ते लोभी। लोभतां, कृपणतां विना दानधर्मचिन्तया स्थितिःअकार्पण्यम्। मनःपूर्वकः भूरि दानगुणः अपेक्षितः। यदा अर्जुनः निरुत्साहः खिन्नः च भूत्वा मनःक्लेशेन रुदन् युद्धम् न करोमि इति रथे उपाविशत् तदा तस्य कार्पण्यदोषः जातः इति श्रीमद्भगवद्गीतायामुक्तं भवति। तत्र आत्मानमेव अतिनिम्नतां कृत्वा दीनः जातः इत्यर्थः। स्वस्य विषये सः लोभी जातः इत्यर्थः। अकार्पण्यम् इत्युक्ते इत्थं दीनः, कृशः, कातरः वा न भूत्वा धीरः, सोत्साहपुरुषः, मनस्वी च भवेत् इत्यर्थः।

अस्पृहा इति अष्टगुणेषु अन्तिमः गुणः। स्पृहा इत्युक्ते इच्छा। अस्पृहा इत्युक्ते अनिच्छा। नैराश्यम् इति। सर्वस्यापि अनर्थस्य मूलं भवति आशा। किन्तु तां मूलतो निष्काशनं दुःसाध्यम्। संस्कारान्

कृत्वा कृत्वा तैः सह अष्टगुणान् पौनःपुन्येन योजयित्वा इत्थम् अभ्यासकरणेन अन्ते इयम् अनिच्छा, निराशा, अस्पृहा इत्येतत् पूर्णरूपेण अनुभवे समागच्छति।

பற்றுக பற்றற்றான் பற்றினை அப்பற்றைப்
பற்றுக பற்று விடற்கு

इति तिरुवल्लुवर् वदति स्म (திருக்குறள்)।

एवम् ईश्वर इत्याख्यम् अस्पृहं स्पृष्ट्वा अन्याः स्पृहाः त्यजामः इत्येतावता नालं भवति। ततः तेन ईश्वरेण समं विद्यमानां स्पृहामपि कर्तनीयम् इति इतोऽपि एकं सोपानमुद्गच्छन् तिरुमूलर् वदति -

ஆசை அறுமின்கள், ஆசை அறுமின்கள்
ஈசனோடாயினும் ஆசை அறுமின்கள்

आशां छिन्धि आशां छिन्धि। ईश्वरोपि आशां छिन्धि। इति तदनुवादः। आशामेव तृट् (तृष्णा) इति बुद्धः वदति स्म। **जलमावश्यकम् जलमावश्यकम्** इति तृषि या ईप्सा भवति तद्वत् आशया बद्ध्यमानामवस्थाम् तृष्णा इति वदन्ति। प्राकृते इमामेव तन्हा इति बुद्धः वदति स्म। आशायाः दूरीकरणमेव बुद्धस्य मुख्यः उपदेशः आसीत्। इयं अष्टगुणेषु अन्तिमा। प्रथममुक्तं कारुण्यम् (Mercy) एव क्रिस्तुधर्मस्य जीवनाडी अस्ति।

इत्थमेकैककमपि (गुणम्) प्रत्येकं धर्मेषु अत्यधिकमुद्धृत्य उच्यते चेदपि इमान् अष्टगुणान् एव क्रिस्तु, बुद्धः, नभिः, नानकः, जोरास्त्ररः, कन्फूषियस् इत्यादयः ये धर्माः भवन्ति तेषां स्थापकाः प्रोक्तवन्तः। ते साक्षात् एतान् अष्टगुणान् न वदन्ति चेदपि इमान् अष्टगुणविहीनान् मनुष्यान् न कोऽपि धर्मस्थापकः आदरं करोतीति तु निश्चप्रचम्।।

(अनुवर्तते.....)

आदिशङ्करस्यानुभूत्यां मातृपितृगुरुदेवाः

Dr. V. RAMAKALYANI
The K.S.R.I., Chennai - 4

गुरुः

प्रश्नोत्तरमालिकायां (श्लो.२) गुरोः लक्षणं कथयति जगद्गुरुः **को गुरुः? यः अधिगततत्त्वः शिष्यहिताय उद्यतः सततम्।** इति गुरुचरणशरणागतिद्वारा शिष्यः सर्वं प्राप्तुं शक्नोति। यः गुरुचरणं न प्राप्तवान् तस्य किमपि न सिद्ध्यति इति गुर्वष्टके (गु.) आचार्यः प्रतिपादयति (गु.१):

शरीरं सुरूपं तथा वा कलत्रं
यशश्चारुचित्रं धनं मेरुतुल्यम्।
गुरोरङ्घ्रिपद्मे मनश्चेन्न लग्नं
ततः किं ततः किं ततः किं ततः किम् ।।

यद्यपि मनुष्यः पत्नी, धनं, पुत्रः, पौत्राः, गृहं, बान्धवाः, वेदवेदाङ्गानि, शास्त्राणि, कवित्वं, यशः, प्रभुत्वं, भोगः, योगः, रत्नानि, मुक्तानि आदि एतत्सर्वमाप्नोति, परन्तु यदि तस्य मनः गुरुचरणारविन्दे न लग्नं, तर्हि तस्य सर्वं व्यर्थं भवति। फलश्रुतिश्लोके आचार्यः एवमाह- **लभेद्वाञ्छितार्थं पदं ब्रह्मसंज्ञं गुरोरुक्तवाक्ये मनो यस्य लग्नम् ।**

गुरुचरणकमलशरणागतिः अज्ञानं दूरीकृत्य एतद्भवसागरं तारयितुं मनुष्यं समर्थं करोति इति गुरुपादुकास्तोत्रस्य प्रथमश्लोके आचार्यशङ्करेण वर्णितम्-

अनन्तसंसारसमुद्रतारनौकायिताभ्यां गुरुभक्तिदाभ्याम्।
वैराग्यसाम्राज्यदपूजनाभ्यां नमो नमः श्रीगुरुपादुकाभ्याम्।।

मोहमुद्गरे अपि एतदेव स्फुटीकृतम्- **गुरुचरणाम्बुजनिर्भरभक्तः संसारादचिराद्भवमुक्तः** इति। अतः गुरोः आशीर्वादेनैव पुरुषः इहपरसुखं लभते।

देवः

श्रीशङ्करभगवत्पादस्य देवः इति शब्दे ईश्वरः, ईश्वरी, विष्णुः, लक्ष्मीः इति सर्वे अन्तर्भूताः। साधारणतया देवभक्तिस्तोत्रेषु कवयः देवं वा देवीं वर्णयन्ति, विद्यां श्रियं विपुलसौख्यमनन्तकीर्तिं आयुरारोग्य-ऐश्वर्यादि सर्वं प्राप्तुं देवं प्रार्थयन्ति। जनाः अपि रोगनिवारणं, पुत्रप्राप्तिः, विवाहः, धनलाभमित्यादि कारणमुद्दिश्य श्लोकान् पठन्ति, पूजयन्ति च। श्रीशङ्कराचार्यः विविधस्तोत्राणि, पञ्चकानि, अष्टकानि, शतकानि आदि रचयितवान्। अनेकशः तद्भक्तिगीतासु पापनाशनं, ज्ञानं, वैराग्यं, मोक्षं, ब्रह्मपदमित्यादि सिद्ध्यर्थमेव प्रार्थयति। श्रीशङ्कराचार्यस्य दृष्ट्यां भक्तिः मोक्षसाधनसामग्र्यां भक्तिरेव गरीयसी इति भावेन भवति। अत्र कानिचित् उदाहरणनि द्रष्टुं शक्यन्ते। भिक्षा अपि किमर्थं भवति आचार्यस्य अनुभूत्याम् इति अन्नपूर्णाष्टकस्य नवमश्लोके दर्शितम्-

अन्नपूर्णे सदापूर्णे शङ्करप्राणवल्लभे।
ज्ञानवैराग्यसिद्ध्यर्थं भिक्षां देहि च पार्वति ।।

दक्षिणामूर्तिस्तोत्रे (श्लोक १६) आचार्येण जीवस्य ब्रह्मणा सह ऐक्यं वर्णितम्- **श्रुत्यर्थं ब्रह्मजीवैक्यं दर्शयन्नोऽवताच्छिवः।** प्रार्थयति च बिल्वपत्रैः (बिल्वाष्टकम्, १५) **अघोरपापसंहारं एकबिल्वं शिवार्पणम्।** कालभैरवाष्टकस्य नवमश्लोके फलश्रुतौ कालभैरवप्रार्थनया किं सिद्ध्यति इति सन्दर्भे, कामादि अरिषड्वर्गं दूरीकृत्य मोक्षं प्रापयति इति आचार्येण स्थापितम्-

कालभैरवाष्टकं पठन्ति ये मनोहरं

ज्ञानमुक्तिसाधनं विचित्रपुण्यवर्धनम्।

शोकमोहदैन्यलोभकोपतापनाशनं

ते प्रयान्ति कालभैरवांघ्रिसन्निधिं ध्रुवम्।।

लक्ष्मीनृसिंहकरुणारसस्तोत्रे (१७) अपि आदिशङ्कराचार्येण प्रोक्तम् -

ये तत्पठन्ति मनुजा हरिभक्तियुक्ता

स्ते यान्ति तत्पदसरोज मखण्डरूपम् ।।

हरिस्तुतौ अपि एवमेव संसारान्धकारनाशनं हरिं वन्दते आचार्यः-

यस्मिन्दृष्टे नश्यति तत्संसृतिचक्रं तं संसारध्वान्तविनाशं हरिमीडे।

शिवमानसपूजायां (श्लो.४) श्रीशङ्कराचार्यः सर्वं शिवायार्पयति- **यद्यत्करोमि तत्तदखिलं शंभो तवाराधनम्।**

यद्यपि द्वित्रिश्लोकेषु लोकसौख्यप्राप्तिं प्रति प्रार्थना दृश्यते, अनेकेषु स्तोत्रेषु भक्तिः मोक्षसाधनार्थमित्येव प्रतिपादिता भवति।

इत्थं आदिशङ्कराचार्यस्यानुभूत्याम् माता अत्युन्नतस्थानम् अलङ्करोति। तस्याः वात्सल्यक्रियाणां कोऽपि प्रतीकारं कर्तुं न शक्नोति। पिता पुत्राय सामाजिकज्ञानं प्रदाय, गुरुं प्रति नयति। गुरुः स्वचरणागतशिष्याय लौकिकविद्यां दत्वा, ब्रह्मज्ञानं प्रदर्शयति। श्रीशङ्कराचार्यस्य दृष्ट्यां ईश्वरं प्रति शुद्धभक्तिभावः मनुष्यं भवसागरात् विमुच्य ब्रह्मपदं नयति। ये जनाः आदिशङ्कराचार्यस्य एतादृशान् श्लोकान् श्रद्धया पठन्ति, ते मातृपितृगुरून् प्रति आदरसहिताः, पवित्रदेवभक्तिद्वारा च सन्तुष्टाः इह सुखाननुभूय परमपदमाप्नुवन्ति।

बालकथा - ७

(वृद्धपितामही चिरन्तनीति नामधेयवती बालान् कथयति)

(चित्रम् - सु.श्री.इन्दु, Intern, SJS Ayurveda College, Chennai)

वत्साः, भाग्यं फलति चेदपि युक्त्या एव तद् भाग्यं स्थिरीभवति। अतः युक्त्या सर्वं साधनीयम्। अस्य उदाहरणाय कथामेकां कथयामि श्रुण्वन्तु।

पुरा कल्याणपुरी इति विख्याता काचित् पुरी आसीत्। तस्यां भाग्यगुप्तनामा वणिक् कश्चन अविद्यत। दैवगतिः दुरत्यया खलु। कालगत्या तस्य वित्तं सर्वमपि नष्टम्, पितरौ च अन्धौ जातौ । स च अनपत्यः अत्यन्तं खिन्नः आसीत्। तस्य पत्नी सुन्दरी। सापि नितरां खिन्ना आसीत्। प्रतिदिनं दारिद्र्येण पित्रोः आन्ध्येन अनपत्यतया च परस्परं खेदं प्रकटन्तौ आस्ताम्। तदानीं सुन्दरी तं दृष्ट्वा देवप्रसादं विना अत्र उपायान्तरं नास्ति। अतः देवप्रसादाय भवान् यतताम् इति प्रार्थयत। पुनः पुनः तया याचितः भाग्यगुप्तः भगवतः प्रसादाय तपः कर्तुं निर्णयम् अकरोत्। सः वनं गत्वा अतिगरिष्ठे तपसि अतिष्ठत्। गच्छता कालेन तस्य तपसा सन्तुष्टः परमेश्वरः तस्य पुरतः आविरभवत्। भगवति प्रसन्ने अत्यन्तं सन्तुष्टः भाग्यगुप्तः

बहुविधाभिः स्तुतिभिः परमेश्वरम् अस्तौत्। तदा प्रसन्नः परमेश्वरः एकमेव वरं वृणीष्व। न अवकाशः द्वितीयस्यापि वरस्य इति अवोचत्। तत् श्रुत्वा व्यामुग्धः भाग्यगुप्तः किं पित्रोः आन्ध्यनिवारणम् अथवा धनम् उत अपत्यप्राप्तिः कि पृच्छेयमिति चिन्तायां न्यमज्जत्। स परमेश्वरस्य निकटे किमपि प्रष्टुं नाशक्नोत्। तेन खिन्नः सः परमेश्वरस्य निकटे वरं प्रष्टुम् अवकाशम् अपृच्छत्। परमेश्वरः अपि सायङ्कालपर्यन्तम् आलोच्य अनन्तरम् आगत्य वरं वृणीष्व इति अब्रवीत्।

भाग्यगुप्तः गृहं प्राप्नोत्। पित्रोः भार्यायाः निकटे च परमेश्वरवचनम् अश्रावयत्। पितरौ स्वकीयाम् अशक्तिम् उक्त्वा आन्ध्यनिवारणं पृच्छ इति अवोचताम्। भार्या च अपत्यप्राप्तिम् अकाङ्क्षत्। भाग्यगुप्तस्य दारिद्र्याद् मुक्तिः भवतु इति चिन्ता अभवत्। पुनः पुनः चिन्तामग्नः भाग्यगुप्तः किंकर्तव्यतामूढ इव आसीत्। ततः आलोचनेन एकेनैव वरेण सर्वविधभाग्यप्राप्तये किं कर्तव्यमिति आलोचयत्। ततः निर्णयं कृत्वा पुनः परमेश्वरम् अस्तौत्। प्रसन्नः परमेश्वरः तस्य पुरतः आविरभवत्। वरं वृणीष्वेति अवदत्। पूर्वमेव कृतनिर्णयः भाग्यगुप्तः प्रभो, एकमेव वरं वृणोमि। देहि इत्युक्त्वा चतुर्दशाट्टालिकायां स्थित्वा मम पितरौ अधः क्रीडतः मम सुतान् पश्यतु, तथा वरं प्रयच्छ इति अयाचत। चतुर्दशाट्टालिकेति धनवत्त्वं निजसुतान् इत्यनेन अनपत्यतानिवारणं पित्रौ पश्यतामित्यनेन पित्रोः आन्ध्यनिवारणञ्चेति सर्वमपि एकेन वरेण अयाचत सः भाग्यगुप्तः। तत् श्रुत्वा परमेश्वरः हसित्वा तस्य बुद्धिं प्रशंसन् सर्वमपि अदात्। तेन सः धनवान्, सुतवान् च समभवत्। पितरौ च दर्शनशक्त्या युतौ अभवताम्। बालाः अपि अश्रुण्वन् भवन्तः, युक्त्या खलु भाग्यगुप्तः सर्वामपि स्वकीयापेक्षां एकेनैव वरेण प्रापत्। भवन्तः अपि कुशाग्रबुद्ध्या भाग्यमपि युक्त्या स्थिरीकुर्वन्तु।

कालिदासकृतरघुवंशे स्त्रीणां वैशिष्ट्यम्

Dr. V.SOWMYANARAYANAN,
Assistant Professor & Head, Dept., of Sanskrit,
D.G.Vaishnav College, Arumbakkam, Chennai 600 106.

प्रस्तावना

पुरा कवीनां गणनाप्रसङ्गे
कनिष्ठिकाधिष्ठितकालिदासः।
अद्यापि तत्तुल्यकवेरभावा-
दनामिका सार्थवती बभूव।।

सत्यमेव। यतो हि कालिदासस्य वाणी मधुरा, प्रीतियुक्ता, सहृदयहृदयाह्लादकरी च भवति। वाल्मीकिव्यासानन्तरं अपारे काव्यसंसारे कालिदास एव प्रजापतिः इत्युक्ते संशयो नास्त्येव। विविधशास्त्राणां व्यासङ्गेन जातं बहुश्रुतत्वं, अनेकासां कलानां प्रयोगेन जातं नैपुण्यं, व्यवहारादागतान् अनुभवांश्च रम्यता-यथार्थता-वैविध्य-शास्त्रीयता-निसर्गता-औचित्यतादिभिःकाव्यानि विरचय्य पठितॄणां प्रीतिं विन्दति कालिदासः। स्वकीये रघुवंशमहाकाव्ये कालिदासः कथं स्त्रीणां वैशिष्ठ्यं वर्णयति स्म इति अस्मिन् व्यासे किञ्चिदास्वाद्यते।।

विवरणम्

अस्माकं भारतीयसंस्कृतौ स्त्रीणां भूमिका महत्त्वपूर्णा विद्यते। योषित्-नारी-महिला-प्रभृतयः स्त्री इत्यस्य पर्यायवाचिनः शब्दाः सन्ति।

यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः।
यत्रैतास्तु न पूज्यन्ते सर्वास्ताः विफलाः क्रियाः।।

इत्याद्युक्तिभिः स्त्रीणां विषये आदरातिशयः गौरवभावश्च अवगम्यते। अस्मिन् व्यासे कालिदासः रघुवंशे कथं स्त्रीजनान् वर्णयति स्म इति पश्यामः। प्रथमं

१.स्त्रीषु देवतारूपेण पार्वतीदेवीमित्थं -

वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये।
जगतः पितरौ वन्दे पार्वती-परमेश्वरौ।।

अत्र पार्वतीदेवी वाग्रूपिणी अर्थरूपपतिसंपृक्ता इति वर्णयति ।

२. दिलीपस्य पत्नी सुदक्षिणा

तस्य दाक्षिण्यरूढेन नाम्ना मगधवंशजा।
पत्नी सुदक्षिणेत्यासीदध्वरस्येव दक्षिणा।।(१ - ३१)

तया मेने मनस्विन्या ....(१-३२) **तस्यामात्मानुरूपायां ..**(१ ३३) इत्यादिभिः श्लोकैः वर्णिता दिलीपस्य पत्नी सुदक्षिणा मगधवंशजा, मनस्विनी, दिलीपस्यात्मानुरूपा, पुत्र-कामिनी, अध्वरस्य दक्षिणा इव विलसति। स्वपत्या दिलीपेन सह कुलगुरु-वसिष्टादेशेन सा सवत्सनन्दिनीं समपूजयदिति-

वधूर्भक्तिमती चैनामर्चितामा तपोवनात् ।
प्रयता प्रातरन्वेतु सायं प्रत्युद्व्रजेदपि।। (१ - ९०)
प्रदक्षिणिकृत्य पयस्विनीं तां सुदक्षिणा साक्षतपात्रहस्ता।
प्रणम्य चानर्च विशालमस्याः शृङ्गान्तरं द्वारमिवार्थसिद्धेः।।

(२ - २१) इति श्लोकाभ्यां कालिदासः वर्णयति।।

३.श्रीरामचन्द्रस्य पत्नी सीता-

श्रीमद्रामायणं सीतायाश्चरितं महदिति सीतायाः स्वरूपं विशेषरूपेण प्रतिभाति। सीता न केवलं रामस्य प्रियपत्नी अपि तु कालिदासेन रघुवंशे संभाविता सत्कृता पवित्रीकृता च। तस्याः कथापात्रं मेघसन्देशे अपि **जनकतनयास्नानपुण्योदकेषु** इति रामगिरिवर्णने उल्लिलेख। रघुवंशे - **राघवाय तनयामयोनिजां रूपिणीं श्रियमिव न्यवेदयत्।** (९-४७)

मैथिलः सपदि सत्यसङ्गरो राघवाय तनयामयोनिजाम् ।। (९-

४८) इति श्लोकाभ्यां सीता अयोनिजा दिव्या इति कालिदासः वर्णयति। रामेण सह सीता वनगमनसमये, कैकेय्या प्रतिषिद्धापि गुणोन्मुखी लक्ष्मीरिव सा राममनुवव्राज इति विषयं -

बभौ तमनुगच्छन्ती विदेहाधिपतेस्सुता।

प्रतिषिद्धापि कैकेय्या लक्ष्मीरिव गुणोन्मुखी।।

(१२-२६)इति वर्णिता। वने सञ्चरणसमये अत्रिमहर्षितपोवने तस्य पत्नी सीतायै सुगन्धलेपनं प्रादात्। तत्सुगन्धलेपनेन कृत्स्नं काननमपि सुरभीकृत्य पुष्पोच्चलितषट्पदं कारयति स्म इति।

अनसूयातिसृष्टेन पुण्यगन्धेन काननम्।

सा चकाराङ्गरागेन पुष्पोच्चलितषट्पदम्।। (१२-२७)

इति श्लोकेन ज्ञायते।।

कलत्रवानहं बाले कनीयांसं भजस्व मे।

इति रामो वृषस्यन्तीं वृषस्कन्धः शशास ताम्।।(१२-३४)

इति श्लोकेन श्रीरामचन्द्रस्य सीतेति-एकपत्नीव्रतत्वं तथा सीतायाः पातिव्रत्यं च दृश्यते।

रावणवधानन्तरं रामेण पुनर्गृहीता सीता इत्यंशः

रघुपतिरपि जातवेदोविशुद्धांप्रगृह्य प्रियाम् (१२-१०४) इति श्लोकेनमनोवाक्कायैस्सा सीता पतिव्रताधर्मंपालयाञ्चकारेति च द्योतते।

रामोऽपि **अवैमि चैनामनघेति किंतु . . . (१४-४०)**इति श्लोकेन सीतां साध्वी इति रामः प्रास्तूयत।

३. दशरथस्य पत्न्यः

तमलभन्त पतिं पतिदेवताः शिखरिणामिवसागरमापगाः।

मगध-कोसल-केकयशाशिनां दुहितरोऽहितरोपितमार्गिणम्।।

(९ १७) इति शलोकः मगधराजदुहिता सुमित्रा, कोसलराजदुहिता कौसल्या, केकयराजदुहिता कैकेयीति च ज्ञायते।

अ) तासु प्रथमा कौसल्या कथंभूता इति

अर्चिता तस्य कौसल्या प्रिया केकयवंशजा।

अतः संभावितां ताभ्यां सुमित्रामैच्छदीश्वरः।।

(१०-५५) इति श्लोकः दशरथस्य पत्नीषु कौसल्या दशरथेन संमानिता संभाविता सत्कृतेति, **ते बहुज्ञस्य चित्तज्ञे पत्न्यौ .....**(१० - ५६) इति श्लोकः दशरथस्य चित्तज्ञा इति, **अथाग्र्यमहिषी राज्ञः.....**(१० - ६६) इति श्लोकः इति वर्णिता भवति।।

आ) द्वितीया कैकेयी कथंभूता इति

अर्चिता तस्य कौसल्या प्रिया केकयवंशजा।

अतः संभावितां ताभ्यां सुमित्रामैच्छदीश्वरः।। (१०- ५५)

इति श्लोकः दशरथस्य प्रेमपात्रभूता प्रियपत्नी कैकेयी इति, ते बहुज्ञस्य चित्तज्ञे पत्न्यौ.....(१० - ५६) इति श्लोकः दशरथस्य चित्तज्ञा इति, **कैकेयी-शङ्कयेवाह पलितच्छद्मना जरा।** (१२ - २) इति श्लोकः कैकेयी स्वकीयपत्युर्वार्धक्यं नैच्छदिति,

तस्याभिषेकसंभारं कल्पितं क्रूरनिश्चया।

दूषयामास कैकेयी शोकोष्णैः पार्थिवाश्रुभिः।।

(१२- ४) इति श्लोकः श्रीरामचन्द्रस्य यौवराज्याभिषेकं नैच्छदिति,

सा किलाश्वासिता चण्डी भर्त्रा तत्संश्रुतौ वरौ।

उद्ववामेन्द्रसिक्ता भूः बिलमग्नाविवोरगौ।।

(१२- ५) इति श्लोकः कैकेयी बहुधा दशरथेन समाश्वासिताऽपि चण्डी भूत्वा स्वकीयमनोरथं पूरयितुं विषसर्पभूतौ द्वौ वरौ पूर्वं दशरथेन प्रतिज्ञातौ अपृच्छदिति च ज्ञापयति।।

इ) तृतीया सुमित्रा कथंभूता इति

अतः संभावितां ताभ्यां सुमित्रामैच्छदीश्वरः।। (१०-५५)

इति श्लोकः कौसल्याकैकेयीभ्यां संभाविता सुमित्रा इति दिशति। कौसल्याकैकेयीभ्यां संभाविता सुमित्रा इति विषयं इतोऽपि **चरोरर्धार्धभागाभ्यां तामयोजयतामुभे।।** (१० - ५६) इति श्लोकेन च कालिदासः द्रढयति।

सा हि प्रणयवत्यासीत् सपत्न्योरुभयोरपि।

भ्रमरी वारणस्येव मदनिस्यन्दरेखयोः।। (१०-५७) इति श्लोकः एषा सुमित्रा सपत्न्योः कौसल्याकैकेय्योः उभयोः प्रणयवती आसीदिति स्मारयति।

सुतौ लक्ष्मणशत्रुघ्नौ सुमित्रा सुषुवे यमौ।

संयगाराधिता विद्या प्रबोधविनयाविव।। (१०- ७१) इति श्लोकः प्रबोधविनयोपमितौ सुतौ लक्ष्मणशत्रुघ्नौ संयगाराधित-विद्योपमिता सुमित्रा सुषुवे अर्थात् अजीजनदिति च सूचयति। इतोऽपि राम-भरत-लक्ष्मण-शत्रुघ्नैः क्रमशः सीता-माण्डवी-ऊर्मिला-श्रुतकीर्तयः परिणीता इति-

पार्थिवीमुदवहद्रघूद्वहो लक्ष्मणस्तदनुजामथोर्मिलाम्।

यौ तयोरवरजौ वरौजसौ तौ कुशध्वजसुते सुमध्यमे।। (११ - ५४) अस्मिन् श्लोके तयोरवरजौ इति पदेन रामविवाहानन्तरं लक्ष्मणविवाहकथनं तस्य रामसाहचर्यमात्रेणैव। न तु विवाहक्रमापेक्षया। अन्यथा लक्ष्मणस्य परिवेत्तृतवदोष प्रसङ्गात् इति रघुवंशव्याख्याकारः नारायणः कालिदासस्य कवननैपुण्यं प्रत्यपादयत्।।

समापनम् :

इतोऽपि इन्दुमती, शूर्पणखा, कुमुद्वती इत्येतासां कथापात्राणि तथा तासां वैशिष्ट्याणि च संयक् प्रतिपादितानि कालिदासेन। समुद्र इव गम्भीरे इयत्तानि एव मुक्ताफलानि मया उपचितानीति विरमामि।।

श्रव्यकाव्यभेदाः

Sri. L. ANANDHAN
Research Scholar, Dept. of Sanskrit, SCSVMV, Kanchipuram

प्रबन्धकाव्ये कविः विस्तृतं क्षेत्रं प्राप्नोति, परं मुक्तके तस्य क्षेत्रम् अत्यन्तं सङ्कुचितं भवति। पद्येनैकेन समस्तानां भावानां समावेशीकरणं, रसानां पूर्णपरिपाकदर्शनं, प्रबन्धकाव्यस्य समस्तरससामग्र्याः एकस्मिन् छन्दसि निबन्धनमिति सर्वमेतत्तु घटे गजनिवेशनमिव भवति। अतः- मुक्तककाव्यरचने प्रबन्धकाव्य-रचनापेक्षया न्यूनाया कौशलताया अपेक्षा नास्ति। मुक्तके प्रबन्धसमानरसस्य धारा न भवति। तत्र तु कथाप्रसङ्गपरिस्थितौ पाठकः आत्मानं विस्मृत्य काव्ये मग्नो भवति तथा सः हृदये स्थायीप्रभावं गृह्णाति। रसप्रभावेणानेन हृदयपुष्पं ईषत्कालं यावत् विकसितं भवति। यदि प्रबन्धकाव्यं किञ्चित् विस्तृतं वनस्थलं मन्येत, तर्हि मुक्तककाव्यं पुष्पगुच्छो भवति। अत्र रमणीयखण्डदृश्यम् इत्थं सहसा अग्रे आनीयते यथा पाठकः श्रोता वा द्वित्रान् क्षणान् यावत् मन्त्रमुग्धत्वमाप्नुयात्। एतदर्थं कवेः मनोहरवस्तूनां व्यापाराणां च कञ्चित् स्तबकं कल्पयित्वा, ततः तमत्यन्तं सङक्षिप्तं कृत्वा सशक्तभाषायां तस्य प्रदर्शनं करणीयं भवति। अतः कवौ कल्पनायाः समाहारशक्त्या सह भाषायाः समासशक्तिरपि यावती अधिका स्यात्, तावत्येव मुक्तरचना सफलतायै कल्पते।

प्रबन्धकाव्येऽपि भेदद्वयं भवति - तद्यथा महाकाव्यं खण्डकाव्यमिति। महाकाव्ये जीवनस्य जगतश्च व्यापकं वर्णनं करणीयं भवति, परं खण्डककाव्ये तु घटनाविशेषस्यैव वर्णनं कर्तव्यं भवति। वस्तुविस्तारः, बहुविधवर्णनं, नायकमहत्ता, चित्रणं, रसपरिपकाः इत्येतेषां

दृष्ट्या महाकाव्ये पर्याप्तानि क्षेत्राणि सन्ति, किन्तु खण्डकाव्ये सीमितान्येव तानि। महाकाव्ये- कथावस्तु कविकल्पनाप्रसूतं सत् प्राचीनाख्यानम्, ऐतिहासिकवृत्तिं वाऽऽश्रितं भवेत्। नायकः सुवंशजः धीरोदात्तप्रकृतिकश्च स्यात्। तत्र नगरः समुद्रः पर्वतः ऋतुः सूर्योदयः जलक्रीडा उपवनविहारः विवाहः यात्रा, युद्धं विजयप्राप्तिः इत्यादीनां वर्णनं यत्र तत्र भवेत्। प्रतिनायकगुणाः अपि उदात्ताः स्युः। महाकाव्ये शृङ्गारवीर्यंयोः अन्यतमो रसो मख्यो भवति। अन्ये रसाः गौणरूपेण प्रयुक्ताः सन्ति। सम्पूर्णं काव्यं सर्गशः विभक्तं भवति। सर्गसङ्ख्या अष्टाभ्यः न्यूना न भवेत्। एकस्मिन् सर्गे एकस्यैव छन्दःप्रकारस्य प्रयोगः स्यात्, सर्गान्ते च तत्परिवर्तनं भवेत्। महाकाव्यस्या प्रारम्भे मङ्गलाचरणं, सज्जनस्तुतिः, खलनिन्दा इत्यादयः स्युः। महाकाव्यस्यैतानि उपर्युक्तानि लक्षणानि नैकेषु लक्षणग्रन्थेषु दृश्यन्ते। खण्डकाव्ये सर्गसङ्ख्या महाकाव्यात् न्यूना भवति, तथा तस्मिन् वर्णनमपि अविस्तारं भवति।

राजशेखरेण प्रबन्धकाव्यं शुद्धं चित्रं कथोत्थं संविधानकभवम् आख्यानवद्योक्तम्। पद्येषु इतिवृत्तात्मकसङ्केतस्य भावाभावत्वभेदेन इदं वर्गीकरणं कृतम्। प्रबन्धकाव्याश्रिते कस्मिंश्चिदपि पद्ये यदि एतानि लक्षणानि लभ्यन्ते, तर्हि तस्य पद्यस्य नामकरणम् एतेषां भेदानामाधारेण कर्तुं शक्यम्। श्रव्यकाव्यस्य वर्ण्यविषयाधारेण भोजेन षड्भेदाः उक्ताः - काव्यं शास्त्रम् इतिहासः काव्यशास्त्रं काव्येतिहासः शास्त्रेतिहासश्चेति। काव्यं शास्त्रम् इतिहासः इति त्रयमेतत् पद्यशैल्यां वर्णयितुं शक्यम्। अस्य मिश्रितरूपवर्णनमपि साध्यम् -

काव्यं शास्त्रेतिहासौ च काव्यशास्त्रं तथैव च।
काव्येतिहासः शास्त्रेतिहासस्तदपि षड्विधम्।। (स.कण्ठा.।)

खण्डकाव्यं शैलीदृष्ट्या महाकाव्यसदृशं भवति। तत्र एका घटना, एकः रसः, एकश्च भावः मुख्यो भवति। एतत् सर्गाष्टकात् ह्रस्वं भवति। क्वचित्क्वचित्तु गीतिकाव्यरूपेणाप्यस्य प्रस्तुतिः साध्या भवति। अन्येषां रसानां वर्णनानां चावकाशः तस्मिन् न्यूनो भवति। महाकाव्यस्य बहुविधप्रभावः, खण्डकाव्यस्य चैकविधप्रभावः भवति।

आचार्यमम्मटः दशमोल्लासात्मके काव्यप्रकाशे द्वितीयोल्लासे शब्दार्थयोः सम्यक्सविस्तरं चर्चां कृतवान्। शास्त्रेषु शब्दस्य भेदौ उपलभ्येते परन्तु साहित्यशास्त्रे शब्दस्य भेदत्रयमुपलभ्यन्ते यथा वाचकशब्दः, लाक्षणिकशब्दः, व्यञ्जकशब्दः। अर्थस्याऽपि भेदत्रयमुच्यते यथा वाच्यर्थः, लक्षणार्थः, व्यङ्ग्यार्थत्वेन। वाच्य-अर्थः वा वाचकशब्दस्य कृते मुख्यार्थस्यारोपः भवति। अतः अत्र वाच्यार्थमेव मुख्यार्थः इत्युच्यते। एतत् साक्ष्यात् साङ्केतितमर्थं भवति। एतस्यार्थवोधनाय शब्दस्य यः व्यापारः जायते स तु अभिधाव्यापार इत्यभिधियते। अत्र वोधजनकव्यापारनाम शक्तिः। यथा- **स मुख्योऽर्थस्तत्र मुख्य व्यापारोऽस्याभिधोच्यते।** (काव्यप्रकाशः-२.८)

लक्षणानिरूपणम्

मुख्यार्थस्य(वाच्यर्थः) प्रतीतिः अभिधाशक्तिद्वारा जायते। स एव मुख्यार्थः प्रप्रथममेव प्रतिपादितः भवति। अनन्तरमेव लक्षणायाः आगमनं भवति।

मुख्यार्थवाधे तद्युगे रूढितोऽथ प्रयोजनात्।
अन्यार्थः लक्ष्यते यत् सा लक्षणाऽरोपिता क्रिया।।

काव्यप्रकाशः -२.९

लक्षणायाः हेतुत्रयं भवति यथा-

मुख्यार्थस्य वाधा (अन्वयस्य अनुपस्थितिः वा तात्पर्यस्यानुपस्थितिः)
मुख्यार्थेन साकं सम्बन्धः (मुख्यार्थेन लक्षणार्थस्य सम्बन्धः)
रूढिः वा प्रयोजनस्यावस्थितिः(रूढशब्दः वा प्रयोजनं स्यात्)

लक्षणायां प्रथमे मुख्यार्थस्य बाधा, मुख्यार्थस्य लक्षणार्थेन साकं साक्षात् सम्बन्धः,रूढिः वा प्रयोजनस्य एकस्यावश्यकता भवति। लक्षणा नाम अन्यार्थस्य प्रतीतिः तथा शब्दस्यारोपिता क्रियेत्युच्यते।

उदाहरणम्

कर्मणि कुशलः वस्तुतः एतस्यार्थः सर्वेषु कार्येषु यः कुशलः वा पटुः इति। परन्तु एतस्य व्याख्या एवं भवति कुशान् लाति आदत्ते इति कुशलः। एतस्यानुसारेण यः कुशान्(दर्भो) आनयतीति। अस्मिन् शब्दार्थे शक्तिः भवति परन्तु कर्मणि कुशान् आनयनं इत्यस्य प्रत्यक्षसम्बन्धः नास्ति। अतः मुख्यार्थस्य वाधे मुख्यार्थस्य वाधे सति विवेचकत्व-सम्बन्धस्यार्थः आयाति यथा कुशलः नाम दक्षः, चतुरः, पटु इति।

द्वितीयोदाहरणम्

बहुप्रसिद्धमिदमुदाहरणं यथा गङ्गायां घोषः अस्यार्थः भवति गङ्गाप्रवाहे आभिरपल्लिः(ग्राम) इति। जलप्रवाहे घोषस्य(ग्रमस्य) आधारः न सम्भवति। अत्र मुख्यार्थस्य बाधा जायते तस्मात् लक्ष्यार्थेन तटः अतिसामीप्यार्थेन शीतलता एवं पावनत्वस्य प्रयोजनं लक्ष्यते। अत्र लक्ष्यणायाः घटकत्रयं द्रष्टुं शक्यते। गङ्गाप्रवाहे आभिरपल्ली इति मुख्यार्थः बाधते तथा गङ्गातटे इति मुख्यार्थेन सम्बन्धार्थः लक्ष्यते। प्रयोजनं भवति पावनत्वं वा शीतलत्वम्। मम गृहं गङ्गातटे अस्तीति मत्वा मम गृहं

पवित्रं तथा शीतलं एवं च जलस्याभाव न दृश्यते इति। प्रथमोदाहरणे (कर्मणि कुशलः) रूढिहेतुका लक्षणा एवं गङ्गायां घोष प्रयोजनहेतुका लक्षणा।

लक्षणायाः भेदाः

लक्षणायाः प्रकारनिरूपणे आचार्याः स्वाभिप्रायं प्रकटितवन्तः तेषु आचार्यमम्मटः सर्वादृतः। आचार्यमम्मटानुसारं मुख्यरूपेण लक्षणा द्विविधा यथा शुद्धालक्षणा तथा गौणिलक्षणा।

स्वसिद्धये पराक्षेपः परार्थं स्वसमर्पणम्
उपादानं लक्षणा चेत् उक्ता शुद्धैव सा द्विधा।।

काव्यप्रकाशः-२.१०

अत्र शुद्धालक्षणा द्विविधा इति ज्ञायते। उपादानलक्षणा, लक्षणलक्षणा इति। स्वसिद्धये पराक्षेपः भवति उपादानलक्षणा। यत्र स्वाभिधेयार्थं न परित्यज्य अन्यार्थं प्रतिपादयति तदस्ति उपादानलक्षणा। अतः उपादानलक्षणा भवति अजहत्स्वार्थलक्षणा एवं लक्षणलक्षणा भवति जहत्स्वार्थलक्षणा। गौणीलक्षणायाः एवं भदौ न स्तः।

(अनुवर्तते.....)

भारतवाणी

आत्मनो बन्धुरात्मैव गतिरात्मैव चात्मनः।
आत्मनो मित्रमात्मैव तथाऽऽत्मा चात्मनः पिता।। १.६७.७

ஒருவனுக்கு தானே உறவு. தானே தனக்கு புகலிடம். தானே தனக்கு நண்பன். தானே தனக்கு தந்தை (பாதுகாப்பாளன்).

पदरञ्जनी - २१

Dr. N. SRIDHAR,
SAFIC, Pondicherry

(अस्य समीचीनमुत्तरं editorsamskritasri@gmail.com प्रति ई-मैल् कर्तुमपि शक्नुवन्ति। समीचीनोत्तरप्रदातॄणां नामप्रकाशनम् अग्रिमसञ्चिकायाम्।)

वामतः दक्षिणम्

१.सेना (२)

२. वायुः (३)

४. वानरः (२)

५.रात्रिः (२)

६. लज्जा (२)

७. पतनशीलः (३)

१४. पक्षी (३)

१६. जनानां समूहः (३)

१७. शुक्लकृष्णपक्षद्वयात्मकः कालः (२)

१९. व्रीहिः (२)

२१. लग्नम्, राश्यर्द्धम् (२)

२३. तॄ धातुः लट्-लकारः उ.पु. बहु.व. (३)

२५. वेगः (तत्पर्यायवाचीशब्दः सप्तमीविभक्त्याम्) (२)

२६. ज्ञा धातुः लट्-लकारः प्र.पु. एक.व. (३)

२७. रामस्य चरित्रकथा (४)

उपरिष्ठात् अधः

१. चाटुः, प्रियवाक्यम् (२)

२. पार्श्वद्वारम् (३)

३. छिद्रम् (२)

४. शिरोऽस्थिखण्डः, कर्परः (३)

८. अश्वः (३)

१०. भासनाटकेषु अन्यतमम् (५)

११. लभ् धातुः लट्-लकारः उ.पु. एक.वचनम् (२)

१२. शुभाशुभसूचकः, उत्पातः (३)

१३. अधोलोकः (३)

१५. हास्यम् (२)

१९. अश्वानां पञ्चधागतिः, नदीप्रवाहः (२)

२०. पीडा (३)

२१. यज्ञः(२)

२२. डी धातुः विधिलिङ् उ.पु. एक.व. (३)

२४. रा धातुः लट्-लकारः, प्र.पु. एक.व. (२)

२५. लक्ष्मीः (२)

एकाक्षरी

९. शिवः, जलम्, पादपूर्णार्थम् उपयोज्यमानम्

१८. ब्रह्मा, हिरण्यगर्भः

पदरञ्जनी - २० (उत्तराणि)

के[1]	श	वः		ज[2]	नि[3]	ता	
तु			वि[4]		त्यम्		क[5]
भ[6]	र[7]	त	प्र	सूः		पा[8]	थम्
	मा		का		रे[9]	कः	
सो[10]		वी[11]	र	रे[12]	णुः		पा[13]
म[14]	री[15]	चिः		णु		स[16]	दः
वा[17]	तिः		ब[18]	का	सु[19]	रः	
रः		प[20]	णः		ता		कुः[21]
	र[22]	ङ्कः		ज[23]		दः[24]	
कु[25]	जः		धा[26]	वा	व[27]		क्षा[28]
तः		प[29]	त्री		सा[30]	ग	रः

संस्कृतश्रीः

माला : ४२ MAY 2020 पुष्पम् : ०५

कलि : ५१२२ शार्वरी - ऋषभमासः ४२-०५

१. सम्पादकीयम्	52
२. कोरोनाशतकम्	53
३. रघुवंशम्	55
४. अष्टाङ्गहृदयम्	57
५. मन्त्रार्थचिन्तनम्	60
६. तिरुक्कुरल्	62
७. रूपकावली	64
८. योगरहस्यम्	66
९. श्रीकृष्णचरितम्	69
१०. शास्त्रं ज्योतिःप्रकाशार्थम्	72
११. श्रीमहास्वामिनां वचः	77
१२. शौचम्	80
१३. बालकथा	82
१४. संस्कृतग्रन्थानां द्रमिडभाषाग्रन्थेषु प्रभावः	84
१५. श्रव्यकाव्यभेदाः	89
१६. संस्कृतव्याकरणम्	91
१७. अभिनवगुप्तः अभिव्यक्तिवादश्च	94
१८. पदरञ्जनी	96

SUBSCRIPTION RATES

ANNUAL	: Rs. 40/-
LIFE SUBSCRIPTION	: Rs. 400/-
PAGE DONATION	: RS.200/-

Subscription and donations may be sent in the form of crossed D.D./Drawn in favour of the Secretary and Treasurer.

DD/Cheque should be sent by Speed Post only

The Samskrit Education Society (Regd.),
Old 212/13-1, St.Mary's Road, Mandaiveli, Chennai - 600 028.
Ph: 044 - 24951402 / Email: editorsamskritasri@gmail.com

सम्पादकीयम्

काव्यामृताब्धेः मथनात्समुत्था
लेखाविभूषैः कमनीयगात्री।
कवीन्द्रनारायणहार्दसद्मा
विभाति धन्या भुवि संस्कृतश्रीः।।

सकलमनुष्यायने श्रीमद्रामायणे श्रीरामाय मङ्गलं दिशन्ती कौसल्येत्थमाह-

यं वै रक्षसि धर्मं त्वं धृत्या च नियमेन च।
स वै राघवशार्दूल धर्मस्त्वामभिरक्षतु।।

इति। नियमेन धृत्या च यं धर्मं रक्षामः स एव धर्मो रक्षितो रक्षत्यस्मान्। आपत्काले कृताः धर्माः बहुगुणं फलं प्रापयन्ति। आकस्मिकतया लब्धसुखोदयैः वयं सन्तुष्यामः। किन्तु तस्य मूलं जन्मान्तरकृतं सुकृतम्। न केवलं सुकृतं शुभं फलं जनयत्यपि च सर्वेषामप्युपकाराय कल्पते। अत एव इष्टापूर्तादिषु पूर्तस्यापि तटाकादिखननरूपस्य प्राधान्यं न्यगादि शास्त्रैः। धर्मेणैव परस्परं रक्षिताः जना समेधन्ते। इदानीन्तनपरिस्थितौ मानवानां तदिरप्राणिनाञ्च अन्नपानादिदानेन तथा अन्यैश्च धर्मैः उपकारो विधेयो येन सकलमपि जगत्समृद्धम् भवति। आपत्सु कृतो धर्मः परत्रेह च शर्मणे भवति। सर्वेषामपि मानवानामुपकार्याः जनाः अर्थिनश्च भवन्त्येव। अतः स्वशक्त्यनुकूलं परोपकारः कर्तव्यः। तदिदं न्यरूपि सुभाषितेनानेन

अष्टादशपुराणेषु व्यासस्य वचनद्वयम्।
परोपकारः पुण्याय पापाय परपीडनमिति।

अतः आपत्कालेस्मिन् परोपकाराय क्रियमाणाः यत्नाः आत्मनः परेषाञ्च श्रेयोभिवृद्धये भवतीति मत्वा तत्र यत्नो विधेय इति प्रार्थयते सम्पादकवर्गः।

कोरोनाशतकम्

Padmasri. ABHIRAJA RAJENDRA MISHRA
Formerly Vice-Chancellor, Varanasi

यथाऽऽसीन्महदातङ्को गौराङ्गशासनावधौ।
विषूचिकामहामार्याः प्लेगनाम्न्या रुजोऽथवा।।१।।

ततोऽपि दारुणं जातं भैरवञ्च महद्भयम्।
करोनाया महामार्या दुराधर्षं निरौषधम्।।२।।

विषाणुरस्य रोगस्य क्षणेनैव प्रवर्धते।
शतं सहस्रं लक्षं वा हित्वा कोटिगुणायते।।३।।

अयं विषाणुर्नासातो मुखाद्वा नेत्रवर्त्मना।
प्रविश्य फुफ्फुसं कम्रं सङ्क्राम्यति निरौषधः।।४।।

नयनं जायते रक्तं किंशुकपुष्पलोहितम्।
ज्वरश्चापि कृतैर्यत्नैरसह्यः प्राणघातकः।।५।।

आगमो निर्गमश्चापि निःश्वासस्य प्रबाध्यते।
फुफ्फुसोऽप्यन्ततो विध्वस्सविस्फोटं विनश्यति।।६।।

नामाऽप्यस्या महामार्या न केनापि श्रुतं पुरा।
धूमकेतुरयं दृष्टस्सहसैव विलक्षणः।।७।।

प्रशमनोपायाः केऽपि सम्बभूवुर्न सार्थकाः।
न च केनापि राष्ट्रेण समाधानं गवेषितम्।।८।।

हाहाकारस्ततो विस्प्राङ्गणेऽद्य समुत्थितः।
वैज्ञानिका दधद्गर्वाः कान्दिशीका विलोकिताः।।९।।

त्रिसहस्राधिका नूनं चीनदेशे दिवङ्गताः।
दक्षिणकोरियादेशेऽप्यहो जातं महद्भयम्।।१०।।

इटल्यामम्बरीषेऽपि पाकिस्तानेऽथ भारते।
मलेशियाऽफगाने वाऽपीराने सर्वतोऽधिकम्।।११।।

प्रायेण निखिले विश्वे सप्तसहस्रसंख्यकाः।
कालस्य कवलीभूताः सागसो वा निरागसः।।१२।।

भारतेऽपि त्रयो हन्त सैरिभवाहनाहृताः।
अकाल एव संसारं प्रविमुच्य दिवङ्गताः।।१३।।

आस्तां तावदिदं सर्वं, राष्ट्रमद्य समुद्यतम्।
आत्मानं रक्षितुं यत्नैः रक्षिष्यत्यपि निश्चितम्।।१४।।

अन्ये शतमिताश्चापि रुग्णा अष्टादशाधिकाः।
यत्नतश्चोपचर्यन्ते भिषग्भी रोगवेदिभिः।।१५।।

भारतेऽपि समायातो रोगोऽयं बाह्यदेशतः।
मिथस्सम्पर्कजस्सोऽयं सहसा बहुलोऽभवत्।।१६।।

भारताभिजना ये वै ईरानादिभुवं गताः।
त एव सार्धमानीतवन्तश्चेमं विषाणुकम्।।१७।।

नैतावदेव, किञ्चन ददृशे सङ्कटान्तरम्।
यद्राष्ट्रस्य कृते जातं समाधेयं प्रयत्नतः।।१८।।

इटल्यां चीनदेशेऽपीराने बहुसंख्यकाः।
प्रवसन्तो भारतीयाः करोनाभयभङ्गुराः।।१९।।

स्वदेशं हि समागन्तुं सञ्जाता द्रुतकातराः।
तेषां कुटुम्बिनश्चापि समुद्विग्ना भयातुराः।।२०।। (अनुवर्तते...)

रघुवंशम्

Sri. R.RANGANATHAN,
Sanskrit Education Society, Kanchipuram

द्वादशसर्गःद्व्यशीतितमः श्लोकः

इतराण्यपि रक्षांसि पेतुर्वानरकोटिषु ।
रजांसि समरोत्थानि तच्छोणितनदीष्विव ।।

पदच्छेदः

इतराणि, अपि, रक्षांसि, पेतुः, वानरकोटिषु, रजांसि, समरोत्थानि, तच्छोणितनदीष्विव ।।

शब्दरूपाणि

इतराणि - तका. नपुं. प्र. बहु।
अपि, इव - अव्य.
रक्षांसि, रजांसि - सका. नपुं. प्र. बहु।
पेतुः - पपात, पेततुः, पेतुः
पत्लृ गतौ इति धातोः लिटि प्र. पु. बहु।
समरोत्थानि - अका. नपुं. प्र. बहु।
तच्छोणितनदीषु - ईका. स्त्री. स. बहु।।

प्रतिपदार्थः

समरोत्थानि- யுத்த பூமியிலிருந்து எழுந்த, रजांसि- புழுதிகள், तच्छोणितनदीष्विव - அவ்வரக்கர்களின் ரத்த ப்ரவாஹங்களில் விழுந்து மறைந்தன போல், इतराणि - மற்ற, रक्षांसि अपि - அரக்கர்களும், वानरकोटिषु - கோடிக்கணக்கான வானரர்களிடையில், पेतुः - விழுந்தனர்.

व्याकरणविशेषः

वानरकोटिषु - वानराणां कोटयः, तासु।

समरोत्थानि - समरात् उत्थानि।

तच्छोणितनदीषु - तेषां शोणितं तस्य नद्यः, तासु।

कोषः

रक्षांसि - यातुधानः पुण्यजनो नैर्ऋतो यातुरक्षसी।

रजांसि - रेणुर्द्वयोः स्त्रियां धूलिः पांसुर्ना न द्वयो रजः।

शोणितम् - रुधिरोऽसृग्लोहितास्त्ररक्तक्षतजशोणितम्।

भावार्थः

कुम्भकर्णवधानन्तरं समागताः राक्षसाः वानरसेनासु निपत्य पञ्चत्वं गताः।।

(अनुवर्तते.....)

भारतवाणी

कान्तारेष्वपि विश्रामो नरस्याध्वनिकस्य वै।
यः सदारः स विश्वास्यस्तस्माद्दाराः परा गतिः।। १.६८.४३

அடர்ந்த காடு வழிச் செல்லும்போதும் மனைவி ஆறுதலாக இருக்கிறாள். எவன் மனைவியோடு இருக்கிறானோ அவன் நம்பிக்கைக்கு உரியவனாதலால் மனைவியே மனிதனுக்குச் சிறந்த ஆதரவு.

सखायः प्रविविक्तेषु भवन्त्येताः प्रियंवदाः।
पितरो धर्मकार्येषु भवन्त्यार्तस्य मातरः।। १.६८.४२

இனிமையாகப் பேசும் மனைவிகள்
தனிமையில் நண்பர்களாகவும்
அறச்செயல்களில் தந்தையாகவும்
துன்பத்தில் தாயாகவும் இருக்கின்றனர்.

अष्टाङ्गहृदयम्

Prof. S. SWAMINATHAN
Sri Jayendra Saraswathi Ayurveda College, Poonamallee

ग्रीष्मर्तुः

अभ्रङ्कषमहाशालतालरुद्धोष्णरश्मिषु।। ३३
वनेषु माधवीश्लिष्टद्राक्षास्तबकशालिषु ।
सुगन्धिहिमपानीयसिच्यमान पटालिके ।।३४
कायमाने चिते चूतप्रवालफललुम्बिभिः ।
कदलीदलकल्हारमृणालकमलोत्पलैः ।।३५
कोमलैः कल्पिते तल्पे हसत्कुसुमपल्लवे।
मध्यंदिनेऽर्कतापार्तः स्वप्याद्धारागृहेऽथवा।। ३६
पुस्तस्त्रीस्तनहस्तास्यप्रवृत्तोशीरवारिणि।

अभ्रङ्कष-महासाल-ताल-रुद्धोष्णरश्मिषु - மேக மண்டலத்தை உரசும் அளவிற்கு வளர்ந்துள்ள பயில், பனை போன்ற மரங்களால் மறைக்கப்பட்ட சூரியக்கதிர்களால் ஆனதும், माधवीश्लिष्टद्राक्षास्तबकशालिषु - குறுகுத்தி முல்லை கொடிகளால் சுற்றி பிணையப்பட்ட திராட்சை கொத்துக்களால் அலங்கரிக்கப்பட்டவையுமான, वनेषु - காடுகளிலுள்ள, सुगन्धिहिमपानीसिच्यमानपटालिके - நறுமணத்துடன் குளிர்ந்த நீரினால் நனைந்து கொண்டிருக்கக்கூடிய துணிகளால் மறைக்கப்பட்டவையும், चूतप्रवालाफललुम्बिभिः चिते - மாந்தளிர் குலைகளும், மாங்காய் குலைகளும் கட்டித்தூக்கி வைக்கப்பட்டதுமான, कायमाने - தட்டிப்பந்தலில், कोमलैः - வாடிப்போகாமல் அழகுடன் கூடிய, कदलीदलकल्हार-मृणालकमलोत्पलैः - வாழையிலை, ஸௌகந்திகப்பூக்கள், தாமரைத் தண்டு,

தாமரையிலை, ஆம்பல் இலை ஆகியவற்றால், कल्पिते - உருவாக்கப்பட்டதும், हसत्कुसुमपल्लवे - வெண்பற்கள் போன்ற நிறமுடைய மலர்களால் சிரிப்பது போன்றும், சிவந்த உதடுகள் போன்ற நிறமுடைய புஷ்பங்களால் அழகூட்டப்பட்ட, तल्पे - படுக்கையில் படுத்து, मध्यंदिनेऽ-र्कतापार्तः - மதிய நேரத்தில் வெயிலின் சூட்டினால் துன்புற்றவன், स्वप्यात् - உறங்க வேண்டும், अथवा - அல்லது पुस्तस्त्री-स्तन-हस्त-आस्य-प्रवृत्त-उशीर-वारिणि-धारागृहे (स्वप्यात्) - பெண் உருவம் கொண்ட பளிங்குக்கற்களின் கொங்கை-கை-வாய் பகுதிகளிலிருந்து வெட்டிவேர்த் தண்ணீர் வீழ்ந்து கொண்டிருக்கும் வீட்டினுள் கிடந்து உறங்க வேண்டும்.

निशाकरकराकीर्णे सौधपृष्ठे निशासु च ।। ३७
आसना स्वस्थचित्तस्य चन्दनार्द्रस्य मालिनः ।
निवृत्तकामतन्त्रस्य सुसूक्ष्मतनुवाससः ।। ३८

निशासु - இரவு நேரங்களில், निशाकरकराकीर्णे - நிலவொளியில் பரவியிருக்குமான, सौधपृष्ठे - மொட்டை மாடியில், स्वस्थचित्तस्य - மனக்கவலைகளிலிருந்து விடுபட்டவனாக இருந்து, चन्दनार्द्रस्य - உடலில் சந்தனம் பூசி, मालिनः - புஷ்ப மாலைகளை அணிந்து, निवृत्तकामतन्त्रस्य - காமகேளிக்கைகளைத் தவிர்த்து, सुसूक्ष्मतनुवाससः - மிகவும் மெலிதான வஸ்திரம் தரித்துக்கொண்டு, आसना च - இருப்பதும் நல்லது.

जलार्द्र तलवृन्तानि विस्तृताः पद्मिनीपुटाः ।
उत्क्षेपाश्च मृदूत्क्षेपा जलवर्षिहिमानिलाः ।। ३९

कर्पूरमल्लिकामाला हाराः सहरिचन्दनाः ।
मनोहरकलालापाः शिशवः सारिकाः शुकाः ।। ४०
मृणालवलयाः कान्ताः प्रोत्फुल्लकमलोज्ज्वलाः ।
जङ्गमा इव पद्मिन्यो हरन्ति दयिताः क्लमम् ।। ४१

जलार्द्राः - தண்ணீரால் நனைக்கப்பட்ட விசிறிகளும், तालवृन्तानि - பனை ஓலைகளும், विस्तृताः पद्मिनीपुटाः - விஸ்தாரமான தாமரையிலைகளும், मृदु-उत्क्षेपाः - நிதானமாக (உடலில்) தூக்கி வீசப்படுவதும், जलवर्षिहिमानिलाः - தண்ணீர் துளிகளைக்கொண்டு குளிரூட்டப்பட்ட காற்று வர்ஷிக்கக்கூடிய, उत्क्षेपाः - வெஞ்சாமரங்களும், कर्पूर-मल्लिकामालाः - கற்பூரமல்லிகை புஷ்பங்களால் உண்டாக்கிய மாலைகளும், सहरिचन्दनाः हाराः - ஹரிசந்தனம் சேர்த்துக்-கோர்த்துக் கட்டியமுத்துமாலைகளும், मनोहरकलालापाः - மனதிற்கினிய கொஞ்சும் பேச்சினை வெளிப்படுத்தும், शिशवः - शारिकाः - शुकाः - குழந்தைகள், பஞ்சவர்ணக்கிளிகள், கிளிகளும், मृणालवलयाः - தாமரைத்தண்டுகளை வளையலாக அணிந்தவரும், प्रोत्फुल्लकमलोज्ज्वलाः - மலர்ந்த தாமரைப்பூக்களால் (அலங்கரிக்கப்பட்டு) ரம்யமானவர்களும், जङ्गमा पद्मिन्यः इव - நடந்துவரும் தாமரைகளோ என்று தோன்றுமளவுக்கு, कान्ताः दयिताः च - மனோஹரமான மனைவிகளாலும், कलमं हरन्ति - வெயில் சூட்டினால் ஏற்பட்ட உடல் தளர்ச்சியை போக்கவேண்டும்.

(अनुवर्तते.....)

मन्त्रार्थचिन्तनम् - ३३

अवैय्यर्थेन सुखिनः स्याम।

Dr. M. JAYARAMAN

Krishnamacharya Yoga Mandiram, Chennai

यदद्य दुग्धं पृथिवीमसक्त। यदोषाधीरप्यसरद्यदापः। पयो गृहेषु पयो अघ्नियासु। पयो वत्सेषु पयो अस्तु तन्मयीत्याह। पय एवात्मन् गृहेषु पशुषु धत्ते। -

तैत्तिरीयब्राह्मणम् १.४.३.३

सायणभाष्यानुसारी मन्त्रार्थः

सन्दर्भः - अग्निहोत्रार्थं क्षीरं हविः भवति। तदर्थं यदा दोहनं क्रियते, तदा यदि क्षीरस्य बिन्दवः भूमौ स्कन्नाः स्युः, तर्हि तत्प्रायश्चित्तरूपेण पठनीयः अयं मन्त्रः। पतितस्य क्षीरस्य मन्त्रोच्चारणेन सङ्ग्रहः क्रियते।

अद्य दुग्धं यत् क्षीरं पृथिव्यां संसक्तम् अभवत्, यच्च क्षीरं जलं वा सस्यानि वा प्राप्नोत्, तत्सर्वं मम गृहे एव भवतु। तत् क्षीरं मम गोषु, वत्सेषु एव भवतु। तत् मयि अपि प्रविशतु। मन्त्रपठनेन अनेन, तत् भूमौ पतितं पयः आत्मनि, गृहेषु, गवादिषु चतुष्पात्सु एव सङ्गृहीतं भवति।

विवरणम्

अयं मन्त्रः अद्यतने जागतिके परिप्रेक्ष्ये अत्यन्तं स्मर्तव्यः मननीयः। जगति सर्वत्र करोना-नामकस्य विषाणोः प्रसारः जातः ।

तेन विषाणुना पीडिताः कोटिशः जनाः। मृतनां च सङ्ख्या लक्षाधिका। अवशिष्टाः गृहेषु एव निबद्धाः। तेन उद्यमाः, कार्यागाराः सर्वेऽपि पिहिताः। जनानां जीविका अपि सङ्कटग्रस्तास्ति। अतः कालेऽस्मिन् यच्च यावच्च धनं धान्यं च विद्यते तस्य सदुपयोगः कर्तव्यः। तस्य विनियोगे वैय्यर्थं न करणीयम्।

तमेवार्थं वेदमन्त्रोऽयं अस्मान् बोधयति। यथा माता अस्मान् नित्यजीवने पालनीयान् नियमान् बोधयति तद्वत् ।

करोना-समस्यातः पूर्वं, सर्वमपि वस्तु यावदपेक्षितं तावत् तु उपलभ्यमानम् आसीत्। इतः अग्रिमः कालः आर्थिकरीत्या कठिनः इति भाति। तदर्थं मानसिकसज्जता करणीया।

अग्निहोत्रमिति वैदिकं नित्यकर्म। तदर्थं यत् क्षीरं दुह्यते तदा जागरूकता पालनीया। क्षीरं भूमौ स्कन्नं सत् व्यर्थं न भवेत्। यदि अनवधानात् पतितमपि भवेत्, पूर्वोक्तमन्त्रोच्चारणेन तस्य मानसिकः मान्त्रिकः सङ्ग्रहः करणीयः। अनेन च अग्रिमे अवसरे वैय्यर्थं न क्रियते इति सङ्कल्पोऽपि इङ्गित एव।

क्रत्वर्थतया , अग्निहोत्रानुष्ठानस्य अवैकल्याय अयं मन्त्रः उपदिष्टः चेदपि, पुरुषार्थताया अपि, अस्माकं नित्यजीवनेऽपि वैय्यर्थाभावः भवेत्, विशिष्य अतिदुस्तरे कालेऽस्मिन्, इति बोधयति वेदमाता। तस्मात् वैदिकाः वयं सम्पन्मूलस्य अवैय्यर्थेन विनियोगं विधाय सुखिनः स्याम, कष्टात् परिरक्षिताः भवेम ।।

(अनुवर्तते.....)

संस्कृतश्लोकानुरूपः - तिरुक्कुरळ्

114 நாணுத் துறவு உரைத்தல் - ह्रीत्यागकथनम्

श्रीकलियन् रामानुजजीयर् (भूतपूर्वः),
நாங்குநேரி

காமம் உழந்து வருந்தினார்க்கு ஏமம்
மடல் அல்லது இல்லை வலி.
पश्चात्प्रियाकामभोगात् तत्प्राप्तिविरहात् भृशम्।
मादृशां दूयमानानां ह्रीत्यागः केवलं बलम्।।

நோனா உடம்பும் உயிரும் மடல்ஏறும்
நாணினை நீக்கி நிறுத்து.
तालाश्वारोहणं देही देहश्च विरहासहः।
कुर्यातां ह्रीं परित्यज्य लोकस्य पुरतो ध्रुवम्।।

நாணொடு நல்லாண்மை பண்டுடையேன் இன்றுடையேன்
காமுற்றார் ஏறும் மடல்.
आस्तां ह्रीपौरुषे पूर्वं मयीदानीं पुनर्न ते।
कामिनो विरहार्तस्य तालाश्वारोहणं गतिः।।

காமக் கடும்புனல் உய்க்குமே நாணொடு
நல்லாண்மை என்னும் புணை.
कामप्रवाहः प्रबलः सार्धं मामकलज्जया।
मत्पौरुषाख्यां नावञ्च दूरीकृत्य विकर्षति।।

தொடலைக் குறுந்தொடி தந்தாள் மடலொடு
மாலை உழக்கும் துயர்.
सायं दुःखानुभूतिञ्च तालाश्वारोहणं गतिम्।
मालाकङ्कणिका मह्यं नायिका प्रददौ द्वयम्।।

மடலூர்தல் யாமத்தும் உள்ளுவேன் மன்ற
படல் ஒல்லா பேதைக்குஎன் கண்.
निर्निद्रे मामके नेत्रे ततोऽहमुचिते तरे।
यामेऽपि तालतुरगसमारोहणतत्परः।।

கடல்அன்ன காமம் உழந்தும் மடல்ஏறாப்
பெண்ணிற் பெருந்தக்கது இல்.
समुद्रनिभकामार्तिदुःखं सोढ्वेह कामिनी।
कालाश्वरोहविमुखी नान्यत्तज्जन्मनो वरम्।।

நிறைஅரியர் மன்அளியர் என்னாது காமம்
மறைஇறந்து மன்று படும்.
प्रियो जेतुमशक्यश्च प्रेमपात्रमथेति च।
अनालोच्य परः कामः आप्तेषु प्रकटीभवेत्।।

அறிகிலார் எல்லாரும் என்றேஎன் காமம்
மறுகின் மறுகும் மருண்டு.
गुप्तसंरक्षितं कामं नाजानन्मे जनाः पुरा।
अधुना लोकमध्येऽसौ सुस्पष्टं बंभ्रमीत्यहो!।।

யாம்கண்ணின் காண நகுப அறிவில்லார்
யாம்பட்ட தாம்படா வாறு.
समक्षमेव मे सख्यो मत्प्रियाया हसन्ति माम्।
स्वयमज्ञतया यत्ताः मदीयक्लेशदूरगाः।।

(अनुवर्तते.....)

Articles for SAMSKRITASRI can be sent to:

editorsamskritasri@gmail.com

रूपकावली - नाचिकेतम्

Prof. VISHNU POTTY. V.S.
Kanchipuram

(नचिकेताः सोपाने विषण्णः अत्यन्तकर्शितदेहस्तिष्ठति)

द्वारपालौ

एकः (आगत्य अपरम्) भोः कोऽयं बालः। बहुकालात्तिष्ठति।

द्वितीयः तर्हि कथं त्वं जानासि। अयं बालः अत्र दिनत्रयात्स्वामिनं प्रतिपाल्य तिष्ठति। प्रथमदिने एव मया गन्तव्यमित्युक्तम्। किन्तु वचनं न अश्रृणोत्। अत्रैव नक्तन्दिवं विना अन्नपानेन तिष्ठति।

एकः कदाचिन्मूर्खः स्यात्।

द्वितीयः न। तत्त्वज्ञ इव भाषते।

(यमराजः आयाति। उभौ विनयेन नमस्कुरुतः। अपश्यन्निव नचिकेतसं यमः अन्तः प्रविशति।)

(सर्वे निष्क्रान्ताः)

(यमराजस्य आस्थानमण्डपम्)

यमराजः सिंहासने उपविशति। गुरवः पुरोधाः मन्त्रिणश्च तत्तदुपयुक्तपीठेषु उपविशन्ति।

यमराजः अभिवादये। असन्निधाने मम दिनत्रयं किं जातमिति कथयन्तु।

द्वारपालः (प्रविश्य)प्राणामाः आर्य। एको बालकः नचिकेतनामकः भवन्तं द्रष्टुं दिनत्रयमेकत्रैवान्नपानेन विना स्थित्वा अनुमतिं पृच्छति। पुनरत्र देवः प्रमाणम्।

यमराजः किं बालः ? मां प्रतीक्षमाणस्तिष्ठति दिनत्रयम् किम्? अस्तु किं करवाणि? सभ्याः कथयन्तु।

प्रधानामत्यः एवमेव राजन्। मयापि सर्वं विचारितम्। देव अतिथिः अग्निसमानः गृहं प्रविशति। अग्निशमनमिव पाद्यासनादि दानलक्षणां शान्तिं कुर्वन्ति जनाः। अतः हे राजन् नचिकेतसे पाद्यार्थमुदकं दीयताम्। अन्यथा प्रत्यवायो भविष्यतीति श्रूयते।

गुरुः सत्यमुक्तममात्यैः। अल्पज्ञस्य पुरुषस्य गेहे अभुञ्जानोऽतिथिः वसति असन्तुष्टः. तस्य आशया प्रतीक्षया वा आर्जितं प्रियवार्गजितञ्च धनादिकं तथैव यागारामादिक्रियाजं पूर्तं फलमपि नङ्क्ष्यति। सर्वावस्थास्वनुपेक्षणीयोऽतिथिः। अतः तं पूजय। प्रत्यवायपरिहारार्थम्।

यमराजः तर्हि अतिथिमन्दिरं नीत्वा सपर्यानन्तरं प्रवेशय।

द्वारपालः यथा प्रभूणामाज्ञा। निष्क्रान्तः

(अनुवर्तते.....)

भारतवाणी

योन्यथा सन्तमात्मानमन्यथा प्रतिपद्यते।
किं तेन न कृतं पापं चोरेणात्मापहारिणा।।

எவனொருவன் தன் மனதில் இருப்பதற்கு மாறான வகையில் தன்னை காண்பிக்கிறானோ தன்னையே திருடிக்கொண்ட அந்தத் திருடன் செய்யாத குற்றம் தான் என்ன?

योगरहस्यम् - ३३

Prof. S. VENUGOPALAN
SJSACH, Nazarathpet, Chennai

अधुना वयं विभूतिपादे अणिमादिसिद्धीनां निरूपणावसरे स्मः। पूर्वस्मिन् सन्दर्भे शरीरान्तर्धानं योगी कथं सम्पादयति इति विषये निरूपितम् आसीत्। अधुना स्वस्यैव अन्तिमः क्षणः कदा, कुत्र, कथं सम्भविष्यति इति ज्ञानं योगी कथङ्कारं प्राप्नोति इति विषये विचार्यते। इतः पूर्वं साधनपादे **सति मूले तद्विपाको जात्यायुर्भोगाः** (यो.सू.२-१३) इति कर्ममूले सति तस्य विपाकतया अस्माकं जात्यायुर्भोगाः निश्चीयन्ते इति ज्ञातम्। तत्र जातिशब्दः जन्मपर्यायः प्रयुक्तः। कस्यां योनौ जन्म भवेदिति विषये निश्चिनोति अस्माकं कर्म एव इति ज्ञातं तस्मात् सूत्रात्। तथा कियत् आयुः, कीदृशाः भोगाः सुखदुःखात्मकाः इति अपि तस्मादेव कर्ममूलविपाकतया ज्ञायन्ते इति प्रोक्तम्। तादृशं यत्कर्म तत् द्विप्रकारं सोपक्रमम्, निरुपक्रमम् चेति। उपक्रमेण सहितं सोपक्रमम्। तद्रहितं निरुपक्रमम्। तथा च यत् कर्म फलजननाय उपक्रमेण - कार्यकरणाभिमुख्येन सह वर्तते तत् सोपक्रमम्। यथा उष्णदेशे प्रसारितम् आर्द्रं वस्त्रम् अतिशीघ्रमेव शुष्यति। तद्विपरीततया यत्र शैत्याधिक्यं वर्तेत, तत्र आर्द्रं वस्त्रं द्विदिनेनापि न शुष्यति। तथा च इदं निरुपक्रमम् इति ज्ञायते। एवं प्रकारेण द्वेधा कर्मणो गतिः वर्तते। तादृशे द्विविधे कर्मणि यः योगी संयमं करोति तदा तादृशानां कर्मणां साक्षात्कारः क्रियते कानि कर्माणि शीघ्रविपाकयुक्तानि, कानि कर्माणि चिरविपाकयुक्तानीति तज्ज्ञानात्

अपरान्तज्ञानम् उत्पद्यते। तत्र अपरान्तः नाम शरीरवियोगः। तथा च परो नाम ब्रह्मा, प्रजापतिः तस्य अन्तः महाप्रलयकालः। तस्मात् भिन्नः अपरः सः मनुष्यः। तस्य अपरस्य मानवस्य अन्तः मरणकालः, तस्य ज्ञानं प्राप्नोति योगी। तथा च अयमर्थः पर्यवस्यति - यः योगी स्वीयकर्मणां द्वेधा भिन्नानां सोपक्रमनिरुपक्रमनामवतां सद्यःफलदानसमर्थानां, चिरकालफलप्रापकयोग्यानां च विषये संयमं करोति सः स्वस्य जीवितस्य अन्तिमः श्वासः कदा, कुत्र, कथं समाप्स्यति इति विषये ज्ञानवान् भवति। तत्रायं विशेषः। सोपक्रमकर्मणां विषये ज्ञात्वा योगी तेषां झटिति भोगार्थं बहु शरीराणि गृहीत्वा स्वेच्छया म्रियते। झटिति भोक्तुं नेच्छति चेत् तत् भुञ्जानः विलम्बेन मरणं प्राप्नोति। तादृसः योगी कदा स्वस्य मृत्युः भवेत् इति स्वयं निश्चेतु प्रभवति।

अस्माकं काञ्चीमहास्वामिनां जीवितात् काञ्चित् घटनां वयमत्र स्मर्तुम् उत्सहामहे। ते कदाचित् स्वस्य ये शिष्याः सहायकाः आसन् तान् एवमूचुः यत् ते विंशत्युत्तरैकशतं वर्षाणि इह लोके जीविष्यन्ति इति। तेषां नवतितमे जन्मजयन्त्युत्सवेऽपि तेषां शरीरस्वास्थ्यं, गतिः, सर्वस्मरणशीलत्वम् इति सर्वमपि विंशतिवयस्कस्य यूनः यथा स्यात् तथा आसीत्। तेषां तपोबलं, ब्रह्मचर्यस्य प्रभावः इति सर्वमपि अवश्यं ते १२० वर्षाणि जीविष्यन्ति इति सर्वेभ्यः प्रकटीचकार। परं ते तादृशाः योगिनः आसन् यत् ते स्वस्य शततमे आयुःकाले एव शरीरत्यागं चक्रुः। यदा अपेक्षितं तदा ते शरीरं त्यक्तुं

क्षमाः आसन् इति वयम् अस्याः घटनायाः ज्ञातवन्तः। नेरूर् सदाशिवब्रह्मेन्द्राणां जीवितचरित्रात् अपि वयं ज्ञातुं प्रभवामः ईदृशीः बह्वीः घटनाः। तेषाम् अधिष्ठानं नेरूर् ग्रामे मात्रं न दृश्यते। अनेकेषु स्थलेषु तेषाम् अधिष्ठानानि विद्यन्ते। शेषाद्रिस्वामिनां विषयेऽपि ईदृशीः कथाः ते, योगवैभवं प्रकाशयन्ति। तिरुवण्णामलै इति प्रथिते अरुणाचलक्षेत्रे यथा अधिष्ठानं तथा ऊञ्जलूर् इति ग्रामेऽपि कावेरी तीरे तेषाम् अधिष्ठानं विद्यते इति तद्भक्ताः विश्वसन्ति। सामान्यैः मनुष्यैः अपि स्वीयः अन्तिमः क्षणः कदा भवति इति ज्ञातुं क्वचित् शक्यते अरिष्टलक्षणानां ज्ञानद्वारा। वसिष्ठसंहिता, मार्कण्डेयपुराणम् इति पुराणग्रन्थेषु, आयुर्वेदशास्त्रग्रन्थेषु अरिष्टस्य विषये तल्लक्षणानां निरूपणविधया बहवो विषयाः उक्ताः सन्ति। तान् पठित्वा सम्यक् ज्ञात्वा सामान्योऽपि मनुष्यः स्वस्य अन्तिमकालविषये ज्ञातुं शक्नोत्येव। वयमत्र विषये इतोऽपि अग्रिमे सन्दर्भे विस्तरशः चिन्तयेम। अस्मिन् पर्याये एतावता विरमामः।।

(अनुवर्तते.....)

भारतवाणी

मन्यते पापकं कृत्वा न कश्चिद्वेत्ति मामिति।
विदन्ति चैनं देवाश्च स्वश्चैवान्तरपूरुषः।। १.६८.२८

ஒருவன் பாபத்தைச் செய்து தன்னை யாரும் அறியவில்லையென்று நினைக்கிறான்.
தேவர்களும் உள்ளுறையும் இறைவனும் அவனை அறிந்திருக்கின்றனர்.

कलिकल्मषघ्नं श्रीकृष्णचरितम् - १०

(वसुदेववचनेन देवक्याः वधोद्योगात्कंसस्य निवृत्तिः, देवकीपुत्राणां कंसकर्तृको वधश्च)

Dr. M. VINOTH
French Institute of Pondicherry,

मायादेव्याः वचनं श्रुत्वा कंसः देवकीं वसुदेवञ्च विमोचितवान्। किञ्च पुत्रहननरूपस्वापराधनिमित्तं क्षमामपि याचितवान् इत्येतावता पूर्वस्यां सञ्चिकायाम् अस्माभिः ज्ञातम्। ततः किमभवत् इत्यधुना विव्रियते। ततः सः क्रूरः कंसः स्वापराधस्यानुतापं कृत्वा स्वगृहम् आगतवान्। ततः तस्यां रात्र्यां व्यतीतायां प्रातः मन्त्रीन् सर्वान् आहूय योगमायया यद्यदुक्तं तत्सर्वमपि उक्तवान्। देवतानां शत्रवः, सदा देवतासु कोपप्रदर्शिनः, सदसद्विषये अविवेकिनः कंसस्य मन्त्रिणः ते दैत्याः कंसमेवम् अब्रुवन् -

हे भोजेन्द्र, योगमायया एवमुक्तञ्चेत् पुरेषु, ग्रामेषु, वज्रादिषु च अनिर्दशान् निर्दशाञ्च शिशून् हनिष्यामः इति। तदर्थस्तु तेषु स्थलेषु दशदिनेभ्यः पूर्वं दशदिनेभ्यः अभ्यन्तरे च ये शिशवः जाताः तान् सर्वानपि शिशून् हनिष्याम इति। किञ्च अवदन् - त्वद्धनुश्शब्दं श्रुत्वैव त्वया सह युद्धं कर्तुं भीताः देवाः यद्यपि महद्यत्नं कुर्युः तथाऽपि न तेन काचिद् हानिः अस्माकं भविष्यति। किञ्च त्वद्बाणौघेभ्यः स्वान् रक्षितुं पलायनमेव महान् उपायः इति विचिन्त्य स्वस्थानं परित्यज्य ययुः। केचन च त्वद्भिया न्यस्तशस्त्राः, अपरे मुक्तकच्छिखाः (धावनेन मुक्तान् केशान् अपि समीकर्तुम् अशक्ताः), अन्ये च प्राञ्जलयस्सन्तः वर्तन्ते स्म। तथाऽपि भवान् युद्धे अस्त्रान् परित्यक्तैः, रथहीनैः, भयेन संवृतैः, युद्धादन्यत्र आसक्तैः, युद्धाद्विनिर्गतैः, भग्नधनुष्मद्भिश्च सह कदाचिदपि न युद्धञ्चकार इत्यस्मादेव ते देवाः त्यक्ताः। अन्यथा यदि त्वामुद्दिश्य युद्धं कृतवन्तः

स्युः तर्हि तदात्वे एव न्यस्तदेहाः अभविष्यन्। गृहेष्वेव शूराः ते देवाः युद्धादन्यत्रैव सर्वदा वीरभावं प्रदर्शयद्भिः तैः दिवौकसैः किं वा कर्तुं शक्यम् इत्युक्त्वा पुनश्च अवदन् -

किं क्षेमशूरैर्विबुधैरसंयुगविकत्थनैः।
रहोजुषा किं हरिणा शम्भुना वा वनौकसा।
किमिन्द्रेणाल्पवीर्येण ब्रह्मणा वा तपस्यता।।

(श्रीमद्भागवतम्, १०.०४.३५-३६)

इत्येवं कथयन्ति स्म। पद्यार्थस्तु - राजेन्द्र, एतान् सामान्यदेवान् त्यजतु। त्वद्भिया जनसञ्चाररहिते स्थले वासं कुर्वता श्रीविष्णुना, अरण्ये वसता रुद्रेण, अल्पवीर्यवता इन्द्रेण, नित्योपसेविना ब्रह्मणा वा किं कर्तुं शक्यम्। किमपि न कर्तुं शक्यते। तथाऽपि शत्रवः नोपेक्षणीयाः। अतः तान् समूलं हन्तुं त्वद्भृत्यान् अस्मान् नियुङ्क्ष्व इत्युक्त्वा तेषां तथा अकरणे नाम मूलेन विनाशकरणाभावे किं भवेदिति राजानं कंसं वदन्ति-

यथाऽऽमयोऽङ्गे समुपेक्षितो नृभिः
न शक्यते रूढपदश्चिकित्सितुम्।
यथेन्द्रियग्राम उपेक्षितस्तथा
रिपुर्महान् बद्धबलो न चाल्यते।।

(श्रीमद्भागवतम्, १०.०४.३८)

इति यथा शरीरे जातस्य आमस्य उपेक्षया कालान्तरे यदा तस्य स्थिरस्थायित्वम् अङ्गे जायते तदा तस्य चिकित्सा दुर्लभा, यथा च योगिनः इन्द्रियान् उपेक्ष्यन्ते येन एकदा विषयेषु प्रविष्टानां तेषाम् इन्द्रियाणां वशीकरणम् अशक्यम्, तथा शत्रुं यदि उपेक्षां कुर्मः तर्हि नूनं बलैः समृद्धः सन् जेतुम् अशक्यो भविष्यति इत्यपि उक्तवन्तः। तथा च देवानां मूलं हि विष्णुः। यदि च तं हन्यामहे तर्हि नूनं भवतां शत्रवः हताः

भवन्ति। कथं वा तस्य विष्णोः हननं संभवेदिति चेत् शृणु - हे राजेन्द्र, ब्रह्मगोविप्राः, तपोज्ञाः, सदक्षिणाः एव तस्य श्रीविष्णोः मूलानि भवन्ति। तस्मात् सर्वात्मना सर्वान् तान् नाम ब्राह्मणान्, ब्रह्मवादिनः, तपस्विनः, यज्ञशीलान्, गाश्च यदि हन्मः तर्हि सः श्रीविष्णुर्हत इव। तदर्थः विप्राः, गावः, वेदाः, तपः, सत्यं, दमः, शमः, श्रद्धा, दया, तितिक्षा, क्रतवश्च हरेः तनुत्वेन गीयन्ते। किञ्च सर्वेषां सुराणाम् अध्यक्षः स एव। तन्मूलाः एव एताः सर्वाः देवाताः, सेश्वराः, सचतुर्मुखाः। अतः तस्य विष्णोः वधोपायः अयमेव भवति यद् ऋषीणां विहिंसनम् इत्येवं बहुविधैः क्रूरभावैः विचिन्त्य दुर्मत्या तं कंसं बोधितवन्तः।

तादृशानां दुष्टस्वभावयुक्तानां स्वस्य मन्त्रिणां दुर्वचःश्रुत्वा कालपाशावृतः सः कंसः ब्रह्महिंसामेव हितमिति मेने। ततश्च साधुजनान् हिंसितुं साधुजनहिंसने रतान् दानवान् दिक्षु गन्तुं सन्दिश्य स्वयमपि स्वगृहं गतवान्। ततश्च रजोगुणस्वभाविनः तमोगुणेनावृताः आगतमृत्यवः (तादृशहिंसनेन येषां मृत्युः समीपे आगतः, ते एवं संबोधिताः) ते दानवाः

आयुः श्रियं यशो धर्मं लोकानाशिष एव च।
हन्ति श्रेयांसि सर्वाणि पुंसो महदतिक्रमः।।

श्रीमद्भागवतम्, १०.०४.४६)

इति महापुरुषेषु हिंसनम् तेषाम् अतिक्रमश्च जीवस्य आयुः, श्रियं, यशः, धर्मं, धर्मेण प्राप्यमानं पुण्यलोकं, सर्वषाम् आशिषश्च हन्ति इत्येतद् ज्ञानं विना सत्पुरुषान् साधून् च विद्वेषं चक्रुः इति श्रीमद्भागवते कंसस्य हस्तादुन्मुक्तायाः देव्याः भगवतारसूचन-कंसानुताप-तदीयदुर्मन्त्रिदुर्मन्त्रणवर्णनपरः चतुर्थाध्यायः समाप्तिमेति।।

(अनुवर्तते.....)

शास्त्रं ज्योतिः प्रकाशार्थम् - १७

Ms. DHWANI J.

IV BAMS, Sri Jayendra Saraswathi Ayurveda College, Chennai

नमः संस्कृतसेवकेभ्यः ! संप्रति सर्वत्रापि एकमात्रः शब्दः श्रूयमाणोऽस्ति - कोरोणा, कोरोणा, कोरोणा - गृहे भव, स्वस्थो भव इति। ननु, अहोरात्रं गृहे एव भवामः। वयं चेदपि बहिर्न गच्छेम, किन्तु स तु क्रिमिः कथमपि अन्तः आगन्तुं शक्नोति - क्रीतेभ्यः वस्तुभ्यः, वस्तुवाहकेभ्यः इति। अतः अस्मात् क्रिमेः स्वरक्षणार्थं हस्तप्रक्षालनादयः बहवः उपायाः सर्वकारादिभिः बहुशः कथ्यन्ते। तेषां पालनमनिवार्यमेव। तदतिरिच्य किञ्चिदस्ति अस्मत्कार्यम्। ननु क्रिमिः तदैव अस्मच्छरीरं सङ्क्रमेत् यदा सः वायौ जीवेत्। यदा वायुः एव क्रिमिहरणक्षमः कल्पेत, तर्हि क्रिमेः आक्रमणस्य तु प्रश्नः एव नास्ति ! कथमेतत् साध्यमिति चेत् तत्रोपायः - धूपनमिति।

आयुर्वेदे धूपनविषये बहुषु प्रसङ्गेषु कथितं भवति। यथा - व्रणितागारार्थं, सूतिकागारार्थं, कुमारागारार्थं, पृथक् पृथक् रोगार्थं, तथा सामान्यतया गृहधूपनार्थमपि। संप्रति तु प्रायः आपणाः पिहिताः एव, अल्पसङ्ख्यकैर्वा चालकैः चाल्यमानाः सन्ति इत्यतः वयं गृहे एव निर्मातुं शक्यान् काञ्चिद्धूपनयोगान् पश्यामः। तत्रादौ -

घृतं निम्बस्य पत्राणि मूलं पुष्पं फलं त्वचम्।
अरिष्टो नाम धूपोऽयमरिष्टं कुरुते क्षणात्।।

(काश्यपसंहिता - कल्पस्थानम् - धूपकल्पाध्यायः)

निम्बवृक्षस्तु अस्मद्देशे सर्वप्रसिद्धः एव। तस्य मूलं यद्यपि वृक्षच्छेदनापेक्ष्यत्वात् न प्राप्तुं शक्यते, तथापि शेषं तु सुलभतया लभ्यत एव - पत्रं पुष्पं फलं त्वगिति। त्वचोऽपि ग्रहणं दुर्लभमेव वृक्षच्छेदनाशक्यत्वात्, अतः पत्रैः सह यत्काण्डं प्राप्यते, यद्वा हस्तेन च्छेत्तुं शक्यते, तदेव स्वीकुर्याम। एषां चूर्णं कृत्वा घृतेन सह संमिश्र्य अग्निस्थापनेन अरिष्टाख्योऽयं धूपः गृहे साध्यः। निम्बवृक्षः खलु क्रिमिघ्नत्वाय लोकप्रसिद्धः एव।

नृकेशाः सर्षपाः पीता गुडो जीर्णश्च धूपनम्।
विषदंशस्य सर्वस्य काश्यपः परमब्रवीत्।।

(अष्टाङ्गहृदयम् - उत्तरस्थानम् - ३७.२३)

अयं योगः वाग्भटाचार्य्येण दंष्ट्राविषप्रसङ्गे उक्तः। स च विषहर्तृत्वादत्र स्वीक्रियते। पीतसर्षपा इत्यत्र संप्रति गृहे या उपयुज्यन्ते ताः स्वीकुर्याम। यदि शक्यते तर्हि पीता एव ग्राह्याः। जीर्णो गुडो यः पिङ्गलवर्णो भवति, न तु यः पीतवत् आभाति।

एतदतिरिच्य **एलादिचूर्णम्** इति सिद्धः कश्चिद्योगः अष्टाङ्गहृदये उक्तः। स च विषहरः (योगस्य ग्रन्थः द्रष्टव्यः प्राक्प्रयोगात्)। लेखनादधः (१) दत्तजालस्थानात् तस्य प्राप्तिः साध्वी इति भाति। तच्चापि चूर्णं धूपनार्थं घृतसहितं प्रयोक्तुं शक्नुमः।

पुरध्यामवचासर्जनिम्बार्कागरुदारुभिः।
धूपो ज्वरेषु सर्वेषु कार्योऽयमपराजितः।।

(अष्टाङ्गहृदयम् - चिकित्सास्थानम् - ३.१६३)

उपर्युक्तोऽयमपि अपराजिताख्यो धूपः क्रिमिघ्नद्रव्ययुक्तो भवति। एनं च सिद्धरूपेणैव वयम् अधोदत्तात् जालस्थानात् प्राप्तुं शक्नुमः(२)।

एषामभावेऽपि सामान्यतया गृहेषु यद्धूपनचूर्णमुपयुज्यते (साम्ब्राणीति लोके) तदपि साधु। अन्यच्च, हरिद्रा, निम्बः, सर्षपाः, घृतं, गोमयं, गोमूत्रं, विडङ्गः, त्रिफला (हरीतकी, विभीतकी, आमलकी चेति), हिङ्गु, शिरीषः, शालः (குங்கிலியம் (कुङ्गिलियम्) इति तमिळभाषायाम् (Shorea robusta इति लटिन्भाषायाम्)), गुग्गुलुः, अगरुः, खदिरः इत्येतादृशद्रव्याणि यथाशक्ति संपाद्य धूपनार्थं तानि योक्तुं शक्नुमः। धूपनेन वातावरणस्य शुद्धिर्भवतीति आधुनिकवैज्ञानिकरीत्याऽपि अनुसन्धानं कृत्वा साधितं भवति। तदुदाहरणार्थम् अनुसन्धानपत्रं किञ्चित् अधः उल्लिखितं भवति(३)।

न खलु ईदृशी लोकस्थितिः अस्मदाचार्येभ्यः परा भवति। आयुर्वेदे जनपदोद्ध्वंसः इति नाम्ना एवंप्रकारा स्थितिः वर्णिता वर्तते। अन्यच्च, नृपादीनां प्राणाः प्रायः शत्रुभ्यः रक्ष्याः इति हेतोः नृपप्राणसंरक्षणविषये बहुधा चर्चितमस्ति अस्मदायुर्वेदग्रन्थेषु। तत्र, शत्रुभिः कथञ्चिदपि नृपमारणार्थं विषं युज्यते इति दर्शयन्त्याचार्याः - यथा राज्ञः अन्ने, वस्त्रे, मुखालेपनचूर्णे, नस्ये, धूपनौषधे, अञ्जने, शय्यायामिति। पृथक् पृथक् सर्वेषमप्येवंविधेषु वस्तुषु विषस्य उपस्थितिं ज्ञातुं तत्र विषलक्षणानि उक्तानि, तन्निर्हरणार्थं चिकित्साश्चोक्ताः। एवंविधासु चर्चासु अन्यतमाऽस्ति **दुन्दुभिस्वनीयः** इति सुश्रुतसंहितायां कस्मिंश्चिदध्याये। तत्र वर्णितः **क्षारागदः** वायौ सर्वत्रापि संयुक्तस्य

विषस्य हरणत्वाय कल्पितः आचार्य्येण। तत्रोच्यते -

अनेन दुन्दुभिं लिम्पेत्पताकां तोरणानि च।
श्रवणाद्दर्शनात्स्पर्शाद्विषात्संप्रतिमुच्यते।।

(सुश्रुतसंहिता - कल्पस्थानम् - दुन्दुभिस्वनीयः)

अयमगदयोगः क्षारागदाख्यः सर्वत्रापि लेपनयोज्यः - दुन्दुभिः, ध्वजः, तोरणमिति परितः यद्यदस्ति, तत्सर्वमपि क्षारागदलिप्तं भवेदिति। क्षारागदलिप्तायाः दुन्दिभेः शब्दश्रवणात्, क्षारागदलिप्तस्य ध्वजस्य दर्शनात्, क्षारागदलिप्तस्य तोरणादेः स्पर्शनाच्च विषात् मुक्तिः प्राप्यते इति भावः। अस्य योगस्य विषहर्तृत्वं वायुना प्रसरति, शब्दनादेनापि प्रसरतीति अत्र गूढार्थः। एतदेव न, अयं क्षारागदः तक्षकमुख्यानामपि दर्पाङ्कुशोऽगदः उच्यते। आयुर्वेदे ये बहवोऽगदयोगाः उक्ताः, ये च योगाः अलिखिता अपि पाम्पारिकरीत्या वैद्यसमूहे जीवन्तः सन्ति, तेषु कश्चिन्मात्रोऽयं क्षारागदः। एवम्, अखण्डतया विषाणाम् उन्मूलनसमर्थेषु अगदयोगेषु सत्स्वपि सर्वकारस्य जनसामान्यस्य च विश्वासः नास्मिन् शास्त्रे विद्यते इति मनःखेदः। शास्त्राज्ञेष्वपि केचित् न स्वधर्मं विश्वसन्तीति ततोऽपि तीव्रतरो मनःखेदः।

न केवलमायुर्वेदः, अपि तु सर्वाण्यपि अस्मत्प्राचीनशास्त्राणि इत्थमेव अमूल्यज्ञेयविषययुक्तानीति जनसमूहस्य लेश एवांशः जानाति, स च समूहः प्रायः वास्तविककार्यकरणे असमर्थः तिष्ठति येन केनापि कारणेन। तत्रास्माभिरेव शास्त्रशिशुभिः अज्ञानभीतस्यास्य लोकस्य उद्धरणं कर्तव्यमिति चिन्त्यते, तदर्थं च क्षेत्रविद्वांसः मार्गदर्शनार्थं

प्रार्थ्यन्ते। एकीभूतानामेव अस्माकं यत्नेन जनाः वास्तविकधनं (शास्त्राख्यं) केषां हस्ते भवति, कुत्र च वस्तुतया समस्यासाधानं भवति इति अवगच्छेयुः। अहो! संप्रति जनपदास्तु तानेव शिलाखण्डक्षेपणेन पीडयन्ति ये जनपदहितार्थं स्वप्राणानामपि चिन्तनम् अकृत्वा परिश्रमं कुर्वन्ति। यत्र तु तेषामेव वैद्यादीनां निस्स्वार्थसेवकानां मूल्यं न दृश्यते मोहान्धजनैः, तत्र गुप्तज्ञानधारकाणां प्राचीनशास्त्रज्ञानां किं वा स्थानम्? आधुनिकवैद्यास्तु शिलाखण्डैः व्रणिताः, अस्मदृशास्तु जनोपेक्षयैव व्रणिताः।

उद्ध्वस्तलोका विषभीतिभीता
विषान्धमूढाः पिहिताक्षियुग्माः।
सुधासुपूराणानमृतस्य कुम्भा-
नश्मोपघातेन विनिक्षिपन्ति।।

(अनुवर्तते.....)

भारतवाणी

आदित्यचन्द्रावनिलानलौ च
द्यौर्भूमिरापो हृदयं यमश्च।
अहश्च रात्रिश्च उभे च संध्ये
धर्मश्च जानाति नरस्य वृत्तम्।।

சூரியனும் சந்திரனும் வாயுவும் அக்னியும் ஆகாயமும் பூமியும் நீரும் தன்மனமும் யமனும் பகலும் இரவும் இரண்டு ஸந்திகளும் தர்மதேவதையும் மனிதனுடைய செயல்களை அறிகின்றன.

गुणः, कार्यञ्च குணமும் செயலும்

(श्रीमहास्वामिनां वचःसमुद्धरणपूर्वकम्)

Dr. S. THIAGARAJAN
Department of Oriental Studies & Research,
SASTRA - Deemed to be Unviersity, Thanjavur

(संस्कारविषये विवरणं कुर्वन्तः परमाचार्याः आत्मज्ञानमार्गः, त्रिविधलोकाः, अष्टौ गुणाः इति क्रमेण संस्कारसंबद्धान् विषयानपि बोधयन्ति।)

किन्तु इत्थं गुणान् मात्रमुक्त्वा **सद्गुणशाली भव, सद्गुणवान् भव** इति इतरे धर्माः वदन्ति, परम् अस्माकं धर्मः तावत् उपदेशमपि दत्त्वा प्रत्यक्षतया कार्यकरणे अपि मनुष्यं योजयितुं नैकानपि संस्कारान् वदति। वृथा उपदेशने प्रयोजनं नास्ति। मनुष्यान् कार्यकरणे बन्धने एव प्रयोजनमस्ति। तदेव अस्माकं धर्मः अपि करोति। इतरेषु धर्मेषु प्रेम, निराशा इत्यादीन् गुणान् मुख्यरूपेण वदन्ति यत्र वैदिकधर्मे सद्गुणेभ्यः मुख्यत्वं न ददत् अनालस्येन कर्मानुष्ठानमेव उक्तमस्ति। सर्वम् अनुष्ठानमयमस्ति इति केचन अयुक्तं चिन्तयन्ति। अष्टगुणाः ततः गुणातीता स्थितिः इत्यादीनि अस्मद्धर्मेषु विशेषरूपेण कथितमस्ति। गुणानधिकृत्य केवलं प्रसारकरणेन न अलम्। सद्गुणयुक्तः भवेत्, सत्यवादी भवेत्, प्रेमी भवेत्, त्यागी भवेत् इत्यादिकमस्माभिः ज्ञातपूर्वमेव खलु? ज्ञात्वैव खलु जीवने तानि आनेतुं न शक्नुवन्तः क्लेशमनुभवामः। एतानेव विषयान् पुनः पुनः शास्त्रे उपदिश्यते चेदपि किं प्रयोजनमायाति? अत एव इतरेषु धर्मेषु इव सदाचाराः, सद्धर्मः (ethics, morality) इति एतानेव विषयानामेव उपदेशकरणं विना, यावदपेक्षितम्

उपदेशानपि उक्त्वा तेनैव समं तत्रैव वयं वास्तविकतया प्रेरणापूर्वकं भूत्वा, अभ्यसनाय उत्साहजनकरूपेण सद्गुणशालिभिः प्राप्तां कीर्तिं, दुर्गुणवद्भिः प्राप्तामपकीर्तिमपि वर्ण्यमानाः असंख्येयाः पुराणपुरुषाणां कथाः अपि अस्मद्धर्मेषु भवन्ति। अयमुत्साहः अपि प्रत्यक्षरूपेण अस्मानं तादृशसद्गुणशालिनं कर्तुं न पर्याप्तमस्तीत्यत एव नैकानि कर्माणि, संस्कारान् च निर्धार्य तेन चित्तशुद्धिं कारयति। सद्गुणशालि भवितुमेव कर्मानुष्ठानमित्याख्यं practical training [प्रत्यक्षाभ्यासः] ददाति अस्मद्धर्मः इति गर्वास्पदे अनुभूयमाने स्थाने, अयं धर्मः इतरानिव धर्मान् न भवतीति दोषाविष्करणं न युक्तम्। अष्टगुणाः तावत् क्रिस्तुभगवतः प्रेम्णः आरभ्य बुद्धभगवता प्रोक्तेन अस्पृहायां समाप्नोति।

गुणान् अधिकृत्य उपदेशकरणेन अलं वा? कार्यकरणमेव खलु मनुष्यस्वभावः? तदाधारेण, तद्द्वारा एव सर्वाणि अपि साधनीयानि भवन्ति? महात्मा गान्धीवर्यः अहिंसा, सत्यमिति बहुधा वदन्नपि तस्य आश्रमे तं पश्यामः चेत् सः सर्वदा अनालस्येन किमपि कार्यं कुर्वन्नेव भवति। अन्यानपि कार्यं कारयति स्म। अतिकठिनः कार्यनियोक्ता (task-master) इति तदाश्रिताः वदन्ति। चर्किकां भ्रामयन् तन्तुवायनं कर्तव्यम्, शौचालयस्य शुद्धता करणीया इति किमपि कार्यं कारयति स्म। ईदृशानि कर्मानुष्ठानानि उक्त्वा तैः साकं तेषामाचरणेन जायमानान् चित्तसंशुद्धिद्वारा अनुचर्यमानान् अष्टगुणान् अधिकृत्यापि धर्मशास्त्रेषु प्रोक्तमस्ति। अस्मिन् विषये गौतमस्य, आपस्तम्बस्य च सूत्राणि अतिप्रबलानि भवन्ति। स्मृतिषु

मनोः प्राबल्यमस्ति। आपस्तम्बः, गौतमः च सर्वेषामपि सामान्यं यत् भवति तल्लिखतः स्म। आपस्तम्बः पृथगपि प्रत्येकं प्रविभागीयानां कृतान् पृथक् पृथक् धर्मान्, संस्कारान् च लिलेख। गौतमः चत्वारिंशत् संस्कारान्, अष्टौ आत्मगुणान् च प्रवदति। जीवात्मा शरीरं त्यक्त्वा स्वयं ब्रह्मलोकं प्राप्तुं एतानि अष्टचत्वारिंशत्कानि कारणानि भवन्ति। एभिः ईश्वरसन्निधानेऽपि गत्वा स्थातुं शक्यम्। तत् परमज्ञानिनः सन्निधानस्थानमिव भवति। विना चञ्चलं सानन्दं भवितुं शक्यते। लोकनियन्ता ईश्वरः यदा लोकातीतः, अरूपः च भवति तदा वयमपि तत्र लयं प्राप्नुयाम। अद्वैतरूपेण भवाम। तावत्पर्यन्तं तस्य लोके (सालोक्यरूपेण) भूत्वा तदनन्तरं तस्मिन्नेव (सायुज्यरूपेण) लयं प्राप्नुयाम। **यस्यैते चत्वारिंशत्संस्काराः अष्टावात्मगुणाः स ब्रह्मणः सायुज्यं सालोकतां जयति** (गौतमधर्मसूत्रम्, प्रथमः प्रश्नः, अष्टमोऽध्यायः) इत्युक्तमस्ति। एतान् चत्वारिंशत् संस्कारान् हस्तपादादीनां चालनपूर्वकं कर्तव्यम्। एकम् उद्योगं (व्यवसायः, कर्म वा) कर्तुं हस्तपादादीन् चालयित्वा, मुखेन भाषणं कृत्वा च करवाम खलु? तथैव इदमपि। यः एतान् अष्टचत्वारिंशत् संस्कारान् अनुतिष्ठति सः ध्रुवं ब्रह्मलोकं प्रयाति। कष्टं, सुखमित्यादिकं यत्र नास्ति तादृशं स्थानं गच्छति। कष्टं, सुखं च कदा न भवति? यः एतौ उद्भावयति तमाश्रयामः चेदेव। आत्मगुणान् आत्मशक्तिः इति वदन्ति। एतत्तु समीपकालीनासु पत्रिकासु उपयुज्यमानं पदम्। पुरातनतमिल्-संस्कृतपुस्तकेषु आत्मशक्तिः इति पदं नास्ति। आत्मगुणाः इत्येवोक्ताः। ते चाष्टौ भवन्तीति पुरा प्रोक्तं मया।

शौचम्

Ms. GAYATHRI, J
IV BAMS, Sri Jayendra Saraswathi Ayurveda College, Chennai

शुचेर्भावः शौचम्। शौचशब्देन वयं सर्वे बाह्यशौचम् एव चिन्तयामः। परन्तु शौचं बाह्यम् आभ्यन्तरमिति द्विविधं प्रोक्तम्। मृज्जलाभ्यां बाह्यशौचं स्मृतम् । तथा मनःशुद्धिः आभ्यन्तरम् इति स्मृतम्। मनुष्यजीविते सफलत्वं नाम लक्ष्यसिद्धिः एव। ततः तत्साधनाय शौचस्य अनुष्ठानं करणीयम्।

अहिंसा सत्यमस्तेयं शौचमिन्द्रियनिग्रहः ।
दानं दमो दया क्षान्तिः सर्वेषां धर्मसाधनम्।।

(याज्ञवल्क्यस्मृतिः)

अतः एते सर्वे धर्मानुष्ठानाय साधनानि भवन्ति। शौचं पञ्चविधं प्रसिद्धम्।

मनःशौचं कर्मशौचं कुलशौचं तथैव च।
शरीरशौचं वाक्शौचं शौचं पञ्चविधं स्मृतम्।।

(महाभारतम्)

अत्र पश्यामः चेत् मनसः शौचम् एव आदौ उक्तम्। ततः यदा अन्तःशौचं भवति तदा बाह्ये अपि शौचं भविष्यति। हृद्गतो भावः एव मुखेन, इतरैश्च अवयवैः अभिव्यज्यते। मनःशुद्धिः एव मनुष्याणां वास्तविकी शुद्धिः। तद्विपरीतेन बाह्यशुद्ध्यर्थं शरीरं पीड्यते चेत् तत् निरर्थकं भवितुम् अर्हति। यत्किमपि कार्यं वयं कुर्मः तस्मिन् शुचिः भवेत्। शौचं न केवलं कायिकेन कार्येण परिपूर्णतां प्राप्नोति, कार्यं तु लक्ष्ये समाविष्टचेतसा करणीयम्। मनुष्यः यदा

ऋजुः भवति तदा धर्मं पालयितुं शक्नोति। यदा मनुष्यः धर्ममार्गेण स्वजीवितं नयति तदा तस्य कार्याणि सर्वाण्यपि धर्मपराणि भविष्यन्ति।

उत्पत्तिपरिपूतायाः किमस्याः पावनान्तरैः।
तीर्थोदकं च वह्निश्च नान्यतः शुद्धिमर्हतः।।

(उत्तररामचरितम्)

यथैव तीर्थोदकं वह्निश्च स्वभावतः एव विशुद्धतया तिष्ठतः, तयोः परिशुद्ध्यर्थम् अन्यद्वस्तु नावश्यकम्। तथैव सीताया अपि परिशुद्ध्यर्थम् अन्यद्वस्तु नावश्यकम्। इति कविः वदति तत्र। यत् गृहं स्वच्छताहीनतया दुर्गन्धेन समन्वितं भवति, तादृशगृहे वसन्तः जनाः कथं सुखं लभेरन्? बाह्यशुद्धेः अभ्यासेन मलिनस्वाङ्गं प्रति जुगुप्सा जायते। तथैव आभ्यन्तरशौचाभ्यासेन आत्मशुद्धिः सौमनस्यम् इत्यादयः लभ्यन्ते। बाह्यशुद्धिः अथवा शरीरशुद्धिः तु स्नानात् एवं चन्दनादि लेपादिप्रयोगात् भविष्यति। परन्तु एतत् मात्रं पर्याप्तं नास्ति। शरीरस्वास्थ्यस्यरक्षणार्थं व्यायामः आवश्यकः। यदा वयं व्यायामं सम्यक् रूपेण कुर्मः तदा शरीरदोषाः सन्तुलिताः भवन्ति। ततः शरीरस्य स्वास्थ्यं प्राप्यते। तथैव प्राणामायादिभिरभ्यासैः मनसः अपि स्वास्थ्यं प्राप्यते। । प्रातःकालध्यानस्य बहूनि फलानि सन्ति। यत्किमपि कार्यं वयं दिनारम्भात् रात्रिं यावत् कुर्मः तत्सर्वम् एकवारं स्मृत्वा निद्रां कुर्मः चेत् वयं नकारात्मकचिन्तां त्यक्त्वा सकारात्मकतया जीवितुं शक्नुमः। एतदपि शौचं प्रत्येव नयति। ततः एतत् वयं अनुशोचामः चेत् स्वस्थतया जीवितुं शक्नुमः ।

बालकथा - ८

(वृद्धपितामही चिरन्तनीति नामधेयवती बालान् कथयति)

(चित्रम् - सु.श्री.इन्दु, Intern, SJS Ayurveda College, Chennai)

वत्साः धनं जीवतस्य उपाय एव, न तु धनं जीवितम् भवति। अतः धनार्जनस्य यत्नेन साकं गुणार्जने अपि यत्नः कर्तव्यः। गुणैः हीनं धनार्जनं नाशाय कल्पते। तत्र इमां कथां श्रुण्वन्तु।

पुरा करवन्दपुरं नाम नगरम् आसीत्। तत्र धनगुप्तनामा कश्चित् वणिक् अभवत्। तस्य सुखगुप्त नामा तनयः अवर्तत। सः स्वपुत्रं सर्वदा धनैकनिष्ठमवर्धयत्। धनस्य उपार्जनाय उपायान् धनगुप्तः अबोधयत्। तस्य पुत्रः गुणैः विहीनः एवावर्धत। धनगुप्तस्य सखा गुणगुप्तनामा कश्चन वणिक् अभूत्। तस्य करुणागुप्तनामा पुत्रः अवर्तत। गुणगुप्तः तस्मै धनोपार्जनोपायान् तथा सद्गुणान् च अबोधयत्। धनगुप्तः तं गुणार्जनेन किम् प्रयोजनं धनार्जनाय खलु यत्नः कर्तव्य इति पर्यहसत्। किन्तु गुणगुप्तः केवलधनार्जनेन जीवितं न फलति। आत्मनश्च हानये भवति इति अकथयत्। किन्तु धनगुप्तः तस्य वाचं वृथाप्रलापम् अचिन्तयत्। उभयोः अपि पुत्रौ कालेन यौवनं

समाप्नुयाताम्।

धनगुप्तगुणगुप्तौ च वृद्धौ अभूताम्। धनगुप्तस्य पुत्रः सुखगुप्तः सर्वदा धनार्जने एव मग्नः अभूत्। तेन धनिकः सन् सर्वविधैः विभवैः अवर्धत। तस्य सौधानि यानानि आभरणानि च बहुविधानि अभूवन्। करुणागुप्तस्तु स्वल्पेन धनेन युक्तोपि परोपकारपरः अभवत्। तदानीम् अपि धनगुप्तं गुणगुप्तं दृष्ट्वा पर्यहसत्। स्वस्य पुत्रस्य विभवं तस्य पुत्रस्य स्वल्पधनवत्त्वञ्च प्रदर्श्य तेन सः परिहासम् अकरोत्।

किन्तु कालेन धनगुप्तगुणगुप्तौ वार्धक्येन पीडितौ अभूताम्। तदा सुखगुप्तः धनमेव परं मन्वानः स्वपितरमपि भरणक्लेशेन अत्यजत्। वीथ्यां त्यक्तं धनगुप्तं दृष्ट्वा करुणागुप्तः तं नीत्वा अपोषयत्। तदानीमेव धनगुप्तः केवलधनार्जनस्य गुणविहिनतायाश्च फलम् अवागच्छत्। सः गुणगुप्तस्य निकटे क्षमाम् अयाचत।

बालाः अपि अश्रुण्वन् कथामिमाम्। धनं केवलं जीवतस्य उपाय एव न तु जीवितस्य सर्वस्वम्। गुणाः एव अस्मान् अन्यान् च पालयन्ति। अतः गुणार्जनं कर्तुं यत्नं कुर्वन्तु।

भारतवाणी

यमो वैवस्वतस्तस्य निर्यातयति दुष्कृतम्।
हृदि स्थितः कर्मसाक्षी क्षेत्रज्ञो यस्य तुष्यति।। १.६८.३०

செய்யும் செயல்களைப்பார்த்துக் கொண்டிருக்கும் எவனுடைய ஜீவாத்மா திருப்தியாய் இருக்கிறதோ அவனுடைய பாபங்களை சூரியனின் மகனாகிய யமன் விலக்கி விடுகிறான்.

संस्कृतग्रन्थानां द्रमिडभाषा (तमिल् भाषा) ग्रन्थेषु प्रभावः

(यथा - सिलप्पधिकारे तमिल् महाकाव्ये स्वप्नविषयाः)

Dr. V.SOWMYANARAYANAN,
Assistant Professor & Head, Dept., of Sanskrit,
D.G.Vaishnav College, Arumbakkam, Chennai 600 106.

अखिलजगन्मण्डलेऽस्मिन् स्वकीयेषु जीवनेषु सर्वैः मनुष्यैः स्वप्नाः दृश्यन्ते। तेषां निराशाः लक्ष्यानि च स्वप्नाः परिणमिताः सन्ति। मनसो आन्तरिका अवस्था एव स्वप्नरूपेण निर्गच्छति। भविष्यत्कालघटनासूचकाः स्वप्नाः। तस्मिन् विश्वासीमनुष्यः स्वकीय आचरणानि यथास्वप्नं घटयति। केचित् मन्यन्ते दिवासमयदृष्टाः स्वप्नाः फलदायिनो वर्तन्ते इति। केचित्तु दिवासमये अनुभूतविषयाः एव स्वप्नरूपेण परिणताः रात्रिसमये मानवेन अनुभूयन्ते इति। स्वप्नाविश्वासिनोऽपि सन्त्यत्र जगतितले। अस्मद्देशीयाः पूर्वजाः अपि स्वप्नद्रष्टार इति काव्येषु इतिहासेषु च उदाहरणानि विद्यन्ते।

स्वप्नवासवदत्तमिति महाकविभासनाटकमतिप्रसिद्धम्। जीवकचिन्तामणौ महाकाव्ये नायकः स्वच्छन्दः नायिकां विजयां प्रति, शेक्स्पियर्नाटके जूलियस् सीसराख्यस्य नायकस्य पत्नी कलिफोर्णिया, श्रीमद्वाल्मीकि-कम्बरामायणयोः विभीषणस्य सुता त्रिजटा इत्यादयः प्रसिद्धाः स्वप्नद्रष्टारः सन्ति। **परिणमतिफलोक्तिः स्वप्नचिन्तास्ववीर्यैः** इति बृहज्जातके वराहमिहिरस्योक्तिरियं बलहीनग्रहदशायाः फलसन्दर्भे उक्ता यत् मानवानामाधुनिकजीवने, बलहीनैः ग्रहैः यानि शुभाशुभफलानि देयानि तानि स्वप्नेषु लभ्यन्ते इति सूचयति। तथैव इलङ्गोवडिगलपि स्वस्मिन् महाकाव्ये सिलप्पधिकारे स्वप्नानधिकृत्य विशदतया विवृणोति। कथानायिकायाः कण्णक्याः कथानायकस्य कोवलस्य तथा पाण्ड्य-महादेव्याश्चेति

त्रयः स्वप्नाः अस्मिन् महाकाव्ये प्रधानतया आलोच्यन्ते। एते सर्वे स्वप्नाः दुःखमयात्मकाः चित्रितास्सन्ति महाकविना इलङ्गोवडिगलेन। तासु स्वप्नद्वयमेव यथासन्दर्भमालोचयामः

१. कथानायिक्याः कण्णक्याःस्वप्नः-

आत्मानमिव क्लिष्टाकुलां कण्णकीं दृष्ट्वा तस्याः दुःखवारणाय

அருகு சிறுபூவை நெல்லொடு தூஉய்ச் சென்று

பெறுக கணவனோடு என்றாள்.

(கனாத்திறமுரைத்த காதை: 43-44)

इति पाषाण्डशास्तुः सविधे देवन्ती अप्रार्थयत्। विगतं कान्तं पुनर्गृहीतुं कानिचन व्रतानि अनुष्ठेयानीति देवन्त्या निर्दिष्टा कण्णकी तस्याः वार्तामनादृत्य -

கடுக்குமென் நெஞ்சம் கனவினால் என்கை

பிடித்தனன் போயோர் பெரும்பதியுள்பட்டோம்

பட்டபதியில் படாதது ஒரு வார்த்தை

இட்டனர் ஊரார் இடுதேளிட்டென் மேல்

கோவலர்க்கு உற்றதோர் தீங்கென்றது கேட்டு

காவலர் முன்னர் யான்கட்டுரைத்தேன்காவலனோடு

ஊர்க்குற்றதீங்குமொன்றுண்டால் உரையாடேன்

தீக்குற்றம்போலும் செறிதொடீஇத்தீக்குற்றம்

உற்றேனொடு உற்ற உறுவனோட யானுற்ற

நற்றிறம் கேட்கின் நகையாகும் பொற்றொடீஇ.

(கனாத்திறமுரைத்த காதை: 45-54)

अर्थात्, अहं मम पतिश्च कोवलः पाण्या पाणिं गृहीत्वा मधुरानगरमगच्छाव। तन्नगरवासिनो जनाः आवयोरुपरि वृश्चिकक्षेपमिव

निन्दां परिकल्पितवन्तः। तया निन्दया कोवलः नितरां दुःखमन्वभूत्। तच्छ्रुत्वाहं राजानमभ्येत्य आत्मनः भर्तृपक्षनीतिं प्रति विवादयन्ती आसम्। अन्ते नीतिं धर्मं चाविचार्य कोवलः पाण्ड्यराजेन हतः इति ज्ञात्वा तद्राज्ञा सह तन्महानगरमपि भस्मावशेषम् अहमकरवमिति आत्मनः दुःस्वप्नं देवन्त्यायै आचचक्षे। एतं दुःस्वप्नं, सा कण्णकी मधुरानगरगमनसमये विस्मृतवती। अवसाने मधुरायां कोवले मृते,

> காய்ச்சினம் தணிந்தன்றிக் கணவனைக் கைகூடேன்
> தீவேந்தன்தனைக்கண்டு இத்திறம்கேட்பல் யான்
> என்றாள்; எழுந்தாள், இடருற்ற தீக்கனா
> நின்றாள், நினைந்தாள், நெடுங்கயற்கண்நீர் சோர...
>
> (ஊர்சூழ்வரி 70-73)

इति कण्णकी आत्मना दृष्टं दुःस्वप्नं विचिन्त्य तथैव तदा राज्ञा सह कृतान् विवदान् च स्मृत्वा बहुधा प्रलपितवती। अतः सूर्योदयात्प्रागेव दृष्टः स्वप्नः सद्यः फलति इति ज्ञायते।

२. कथानायकस्य कोवलस्य स्वप्नः

कोवलः कण्णक्या सह काविरिप्पूम्पट्टणनगरे स्वजीवनं यापयन्नासीत्। सः तस्मिन्नगरे वसन्, एकदा कण्णक्या सह मञ्चे स्वपिति स्म। तदात्वे-

> காவல்வேந்தன் கடிநகர் தன்னில்
> நாறு ஐங்கூந்தல் நடுங்குதுயர் எய்த
> கூறைகோட்பட்டு கோட்டுமா ஊரவும்
> அணித்தகு புரிகுழல் ஆயிழை தன்னொடும்
> பிணிப்பறுத் தோர்தம் பெற்றி எய்தவும்
> மாமலர் வாளி வறுநிலத்து எறிந்து

காமக்கடவுள் கையற்றேங்க
அணிதிகழ் போதி அறவோன் தன்முன்
மணிமேகலையை மாதவி அளிப்பவும்
நனவு போல நள்ளிருள் யாமத்துக்
கனவு கண்டேன் கடிதீங்கு உறுமென...

(அடைக்கலக்காதை 95-105)

इति अर्थात् पाण्ड्यराजस्य नितान्तं रक्षिते मधुरैमहानगरे, पञ्चभिर्वेणीभिः सौगन्धिलेपनैश्च समलङ्कृतमूर्धजयुक्ता मदीया पत्नी कण्णकी, यथा यां दृष्ट्वा द्रष्टारः कम्पिताः तथा घोररूपवेषभूता आसीत्। मद्वस्त्राणि च तत्रस्थजनैरपहृतानि। ते मां महच्छृङ्गिनं महिषमारोपयामासतुः। श्लथालकाबन्धकेशयुतया मदीयया पत्न्या सह जीवनस्य चतुर्थामन्वभवम्। कुसुमसुकुमारां नववयस्कां माधव्यां सञ्जातां मत्सुतां मणिमेखलां, माधवी मन्मथं वञ्चयित्वा महातपोधनसन्निधौ तापसजीवनाय समर्पितवती। निजसम्भवमिव चरमे यामे आत्मना दृष्टं दुःस्वप्नं सर्वं मधुरानगरे कस्मैचित् ब्राह्मणस्य कृते विवृणोति स्म। अनेन सूर्योदयात्प्रागेव दृष्टः स्वप्नः सद्यः फलति इति ज्ञायते। ज्योतिषे तु स्वप्नाः यथार्थतया सप्तधाः इति वर्णिताः।

दृष्टः श्रुतोऽनुभूतश्च प्रार्थितः कल्पितश्च यः।
भाविको दोषजश्चैव स्वप्नः सप्तविधः स्मृतः।।

इति स्वप्नप्रकाशिकाख्येन ग्रन्थेन ज्ञायते। तत्र पञ्चविधं पूर्वमफलं भिषगादिशेत्। इति स्वप्नप्रकाशिका तथा तेष्वाद्या निष्फला चैव पञ्च हि प्रकृतिर्दिवा । ३१-३१ इति स्वप्नमार्गः इति च ग्रन्थौ, सप्तविधेषु स्वप्नाः पूर्वपञ्चविधाः स्वप्नाः निष्फला एव इति सूचयतः।

स्वप्ने तु प्रथमे यामे संवत्सरविपाकिनः।

द्वितीये चाष्टभिर्मासैः त्रिभिर्मासैस्तृतीयके

चतुर्थयामे यस्स्वप्नो मासेन फलदः स्मृतः।

अरुणोदयवेलायां दशाहेन फलं भवेत्

गोविसर्जनवेलायां सद्य एव फलं भवेत्।। ४४

गोविसर्जनवेलोयामित्युक्ते यदा गावः वनेषु नीयन्ते तस्मिन् काले अर्थात् सूर्योदयात्प्रागेव दृष्टः स्वप्नः सद्यः फलति अर्थात् तात्कालितरूपेण फलदायकः इति स्वप्नप्रकाशिकाग्रन्थः निर्दिशति।

दिवास्वप्नमतिह्रस्वमतिदीर्घं च बुद्धिमान्।

दृष्टः प्रथमरात्रेः यः स्वप्नः सोऽल्पफलो भवेत्।। ४-५

इति अमुमंशमेव स्वप्नमार्गाख्यग्रन्थोऽपि द्रढयति। कादम्बर्यां बाणभट्टेनापि आवेदयन्ति हि प्रत्यासन्नमानन्दमग्रेपातीनि शुभानि निमित्तानि। अवितथफलाः हि प्रायो निशावसानसमयदृष्टाः भवन्ति स्वप्नाः इति तारापीडेन दृष्टेण स्वप्नवर्णनेन पठितॄणां विश्वासः उत्पादितः। वितथः क्षुधापिपासामूत्रपुरीषोद्भवः स्वप्नः १३८-१३९ इति ज्योतिषशास्त्रे स्वप्नप्रकाशिकाख्यो ग्रन्थः स्वप्ननिष्फलमपि द्योतयति।

समापनम्

इतोऽपि पाण्ड्य-महादेवी अन्तःपुरे आत्मना दृष्टं दुःस्वप्नं स्वस्याः सख्याः कृते समाचचक्षे। स्थालीपुलाकन्यायेन इयत्तामेव मया स्वीकृत्य आलोडितम्। मह्यमपि दत्तावसरेभ्यः महद्भ्यः धन्यवादं समर्प्य समापयामि।

श्रव्यकाव्यभेदाः

Sri. L. ANANDHAN
Research Scholar, Dept. of Sanskrit, SCSVMV, Kanchipuram

उपादानलक्षणा - कुन्ताः प्रविशन्ति एवं यष्टयः प्रविशन्ति।

उपरस्तोदाहरणयोः कुन्ताः तथा यष्टयः द्वौ शद्बौ अचेतनौ जडौ पदार्थौ स्तः। प्रवेशरूपकक्रियासम्मादने असमर्थौ द्वौ लक्षणया उभयोः सिद्धार्थं पुरुषस्याक्षेपः क्रियते। यथा कुन्ताः धारि पुरुषाः प्रवितोन्ति एवं यष्टिधारि पुरुषाः प्रविशन्ति। अत्र स्वाभीष्टार्थं न परित्यज्य अन्यार्थं प्रतिपाद्यते इति कारणात् अत्र उपादानलक्षणा।

लक्षणलक्षणा - गङ्गायां घोषः

अत्र गङ्गाप्रवाहे घोषः न सम्भवति। अतः गङ्गतटे इति नूतनार्थः लक्षणया आयाति। अत्र परार्थे स्वार्थस्य समर्पणं जातमितिकारणात् लक्षणलक्षणा उच्यते। पुनः सर्वेषां सारोपा साध्यवसाना रूपेण भेदद्वयं दृश्यते।

सारोपायाः लक्षणम्-

सारोपाऽन्यतु यत्रोक्तौ विषयी विषयस्तथा काव्यप्रकाशः-२.१०

आरोप्यमाणः आरोपविषयश्च यत्रानपह्नुतभेदौ समानाधिकरणेन निर्दिश्यते सा सारोपालक्षणेति अभिधियते। आरोप्यमाणविषयी(गौः) तथा आरोप्यमाणविषयः(बाहिकः) उभयोः समानविभक्तियुक्तपदानां प्रयोगः भवति।

साध्यवसाना - विषयन्तः कृतेऽन्यस्मिन् सा स्यात्साध्यवसानिका

काव्यप्रकाशः-२.११

विषयिणाऽऽरोप्यमाणेनान्तःकृते निगीर्णे अन्यस्मिन्नारोपविषये सति साध्यवसाना स्यात्। सारोपासाध्यवसानलक्षणायाः शुद्धागौणीभेदेन प्रकारद्वयं भवति। भेदसर्वमाहत्य लक्षणा षड्विभा भवति। यथा-

भेदाविमौ च सादृश्यात्सम्बन्धान्तरतस्तथा
गौणौ शुद्धौ च विज्ञेयौ लक्षणा तेन षड्विधा।।

काव्यप्रकाशः-२.१२

१ शुद्धा उपादानसारोपालक्षणा (कुन्ताः पुरुषाः प्रविशन्ति)
२ शुद्धा उपादानसाध्यवसानालक्षणा(कुन्ताः प्रविसन्ति)
३ शुद्धा लक्षणसारोपालक्षणा(आयुर्घृतम्)
४ शुद्धा लक्षणसाध्यवसानालक्षणा(आयुरेवेदम्,गङ्गायां घोषः)
५ गौणी सारोपालक्षणा(गौर्वाहीकः)
६ गौणी साध्यवसानालक्षणा(गौरयम्)

भारतवाणी

दह्यमाना मनोदुःखव्याधिभिश्चातुरा नराः।
ह्लादन्ते स्वेषु दारेषु घर्मार्ताः सलिलेष्विव।। १.६८.४९

மனத்துயரங்களாலும் மிகுதியான நோய்களாலும் வருந்திக் கொண்டிருக்கும் மக்கள், கோடைக்காலத்தில் தாபமடைந்தவர் தண்ணீரால் மகிழ்வது போல் தத்தம் மனைவியரிடத்தில் ஆறுதல் பெறுகின்றனர்.

संस्कृतव्याकरणम्

Sri. GANESHDEVARU BHATT
Research Scholar, Amrita Vishwa Vidyapeetham, Coimbatore

गुरो गुरुतरागम्य गुरुगम्य गुणाकर।

गुरूत्तम नमस्तेऽस्तु सन्निधौ भव सर्वदा।।

दक्षिणे लक्ष्मणो यस्य वामे तु जनकात्मजा।

पुरतो मारुतिर्यस्य तं वन्दे रघुनन्दनम्।।

पाणिनीयं व्याकरणमिदं वेदाङ्गव्याकरणिमिति प्रथितमिति सर्वैरपि विदितमेव। कथङ्कारं तस्य वेदाङ्गत्वमिति चेत्, भगवद्भिर्भाष्यकारैः पतञ्जल्याचार्यैः शब्दज्ञानफलकव्याकरणाध्ययनस्य प्रयोजनकथनावसरे **रक्षोहागमलघ्वसन्देहाः प्रयोजनम्, रक्षार्थं वेदानामध्येयं व्याकरणम्** इत्यभाणि। एवञ्च वेदस्य रक्षणे, वेदार्थनिश्चये च सहायकस्य पाणिनीयव्याकरणस्य वेदाङ्गत्वं समुपपन्नमेव।

अस्य च वेदाङ्गव्याकरणस्य किं स्वरूपमिति स्वरूप-जिज्ञासायामुदितायां, पुनरत्र लक्ष्यलक्षणे व्याकरणम् इति भाष्यवचनमेव शरणम्। पाणिनीयव्याकरणापेक्षया यद्यपि बहूनि व्याकरणान्यासन् तथाऽपि पाणिनीयमेव व्याकरणं वेदाङ्गत्वेन जेगीयते लोके। कुतोऽन्यानि व्याकरणानि प्रसिद्धिं नावापुर्नाम प्रतिपदपाठविषयत्वात्तेषाम्। प्रतिपदं साधुत्वप्रतिपादनाय प्रवृत्तानाम् इन्द्रादीनां यद्व्याकरणं, तत्तावत् नान्तं जगाम। अत्र भाष्यपङ्क्तिरेव प्रमाणम्। तथाहि बृहस्पतिरिन्द्राय दिव्यं वर्षसहस्रं प्रतिपदोक्तानां शब्दानां शब्दपारायणं प्रोवाच नान्तं जगाम इति। इदानीन्तनेष्वस्मासु कश्चिच्चिरञ्जीवति नाम वर्षाणां शतमेव।

तस्मादिदानीन्तनैरस्माभिः तद्व्याकरणाध्ययनं दुश्शकमेव। वेदरक्षणं वा वेदार्थनिश्चयो वा अतिदूरे एव स्यादिति मत्वा, महद्भिः पाणिन्याचार्यैः भगवतो महेश्वरस्य कृपाकटाक्षवशात्, भगवतो नृत्तावसाने चतुर्दशसूत्राणि लब्ध्वा, लघुनोपायेन इदं व्याकरणं प्रस्तोतव्यमिति कारणात्, प्रत्याहारशैलीमाधाय सूत्ररूपेण व्याकरणमिदं प्राणायि। प्रणयनावसरे आचार्यैः तत्र तत्र प्राचीनोक्ताः व्याकरणोपयोगिन्यः संज्ञाः प्रोक्ताः च।

इदं च व्याकरणं ज्योतिषामपि ज्योतिः। शब्दो ज्योतिः, तस्यैव व्यक्तीकरणमनेन व्याकरणनेन क्रियते। तदुक्तं श्लोकेन-

इदमन्धं तमः कृत्स्नं जायेत भुवनत्रयम्।
यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते।। इति

पाणिनीयं व्याकरणं तावत् भगवद्भिः पतञ्जल्याचार्यैः विरचितमहाभाष्यद्वारा सुरक्षितम् इति उच्यते चेत् नास्ति तत्र विप्रतिपत्तिः। पाणिन्याचार्यैः विरचितानि सूत्राणि आधारीकृत्य पतञ्जल्याचार्यैः भाष्यं व्यरचि। एवं सूत्रोक्तानुक्तदुरुक्तचिन्तनार्थं कात्यायनाचार्यैः वार्तिकानि व्यरचिषत। तत्र पुनः भाष्यमेव विषयीकृत्य तदुपरि कैयटेन एवं नागेशभट्टेन च क्रमात् प्रदीपः, उद्योतः च व्याख्याग्रन्थो निरमायि। एवम् उत्तरत्रापि मुनित्रयोक्तान् एव अंशान् विषयत्वेन स्वीकृत्य सर्वेऽपि ग्रन्थान् विरचयामासुरेवं तां परम्परां श्रद्धया च परिपाल्यामासुः। तत्र नागेशभट्टाः अपि अन्यतमाः। श्रीमद्भिः नागेशभट्टैः अनेके संस्कृतग्रन्थाः व्यरचिषत। ते च परिभाषेन्दुशेखरः, लघुशब्देन्दुशेखरः, उद्योतः (भाष्यव्याख्यानम्), लघुमञ्जूषा,

परमलघुमञ्जूषा, एवं चण्डीसप्तशत्याः नागोजीभट्टी इत्येवमादयः। तत्र प्रसिद्धः स्वतन्त्रश्च ग्रन्थः परिभाषेन्दुशेखरः। अनियमे नियमकारिण्यः परिभाषाः। ताः एव उद्दिश्य श्रीमद्भिः नागेशभट्टैः ग्रन्थोऽयं समरचि। अस्मात् ग्रन्थात् प्रागेव परिभाषाणां विषये व्याडिकृतः परिभाषापाठः एवं सीरदेवविलिखिता परिभाषावृत्तिः च गणनाप्रसङ्गे प्रसिद्धिं ययौ।

अयं च ग्रन्थः त्रिप्रकरणात्मकः। एवं सीरदेवकृतपरिभाषावृत्तिश्च त्रिप्रकरणात्मिकेति कृत्वा सीरदेवग्रन्थरचनायाः अत्रापि प्रभावो दृश्यते इति वक्तुं शक्यम्। तत्र प्रथमं प्रकरणं भवति शास्त्रत्व सम्पादनोद्देशप्रकरणमिति। प्रकरणमिदं सप्तत्रिंशत्परिभाषाभिरलङ्कृतम्। ततो द्वितीयं बाधबीजनामकं प्रकरणं चतुस्त्रिंशत्परिभाषात्मकम्। ततः तृतीये तन्त्रशेषनामके प्रकरणे द्विषष्टिः परिभाषाः इत्येवं संहृत्य त्रयस्त्रिंशदधिकैकशतं परिभाषाः व्याख्याताः। तदुपर्यपि अनेके व्याख्यानानि अलेखिषुः। नागेशगूढार्थदीपिका, तत्वप्रकाशिका, गदा, सर्वमङ्गला, वाक्यार्थचन्द्रिका, हैमवती, भैरवी, तत्वादर्शः इत्येवमादीनि। मुनित्रयोक्तांशान् , ग्रन्थाशयं च विलोक्य अविरुध्य च यथामति इत उत्तरत्र अत्र विचाराः प्रस्तूयन्ते।

भारतवाणी

आत्मात्मनैव जनितः पुत्र इत्युच्यते बुधैः।
तस्माद्भार्यां नरः पश्येन्मातृवत्पुत्रमातरम्।। १.६८.४७

ஒருவன் தானே தனக்கு மகனாகப்
பிறக்கின்றான் என்று அறிஞர்கள் கூறுவதால்
தன்மகனுக்குத் தாயாகிய தன் மனைவியைத்
தாயைப்போலப் பாதுகாக்க வேண்டும்

अभिनवगुप्तः अभिव्यक्तिवादश्च

Dr. V. NAGARAJAN
Dept. of Sanskrit, SCSVMV, Kanchipuram

लोके प्रमदादिभिः स्थाय्युमानेऽभ्यासपाटववतां काव्ये नाट्ये च तैरव कारणत्वादिपरिहारेण विभावनादिव्यापारवत्त्वाद-लौकिकविभावादिशब्दव्यवहार्यैर्ममैवैते इति सम्बन्धविशेषस्वीकार-परिहार-नियमानध्यवसायात् साधारण्येन प्रतीतैरभिव्यक्तः सामाजिकानां वासनात्मतया स्थितः स्थायी रत्यादिको नियतप्रमातृगतत्वेन स्थितोऽपि साधारणोपायबलात् तत्कालविगलितपरिमितप्रमतृभाववशोन्मिषितवेद्यान्तरसम्पर्क-शून्यापरिमितभावेन प्रमात्रा सकलसहृदयसंवादभाजा साधारण्येन स्वीकार इवाभिन्नोऽपि गोचरीकृतश्चर्व्यमाणतैकप्राणो विभावादिजीवितावधिः पानकरसन्यायेन चर्व्यमाणः पुर इव प्रस्फुरन् हृदयमिव प्रविशन् सर्वाङ्गीणमिवालिङ्गन् अन्यत् सर्वमिव तिरोदधत् ब्रह्मास्वादमिवानुभावयन् अलौकिकचमत्कारी शृङ्गारादिको रसः। काव्यप्रकाशः , P.91-93

सत्त्वोद्रेकादखण्डस्वप्रकाशानन्दचिन्मयः।
वेद्यान्तरस्पर्शशून्यो ब्रह्मास्वादसहोदरः
लोकोत्तरचमत्कारप्राणः कैश्चित् प्रमातृभिः।
स्वाकारवदभिन्नत्वेनायमास्वाद्यते रसः।। सा.द. ३.२-३
शोकहर्षादयो लोके जायतां नाम लौकिकाः।
अलौकिकविभावत्वप्राप्तेभ्यः काव्यसंश्रयात्।।
सुखं संजायते तेभ्यः सर्वेभ्योऽपीति का क्षतिः।
अश्रुपातादयस्तद्वद् द्रुतत्वाच्चेतसो मताः।।
न जायते तदास्वादो विना रत्यादिवासनाम्।
व्यापारोऽस्ति विभावादेर्नाम्ना साधारणीकृतिः।
तत्प्रभावेण यस्यासन् पाथोधिप्लवनादयः।

प्रमाता तदभेदेन स्वात्मानं प्रतिपद्यते।
उत्साहादिसमुद्बोधः साधारण्यभिमानतः।
नृणामपि समुद्रादिलङ्घनादौ न दुष्यति।
साधारण्येन रत्यादिरपि तद्वत् प्रतीयते।
परस्य न परस्येति ममेति न ममेति च।
तदास्वादे विभावादेः परिच्छेदो न विद्यते।
विभावनादिव्यापारमलौकिकमुपेयुषाम्।
अलौकिकत्वमेतेषां भूषणं न तु दूषणम्।
कार्यकारणसञ्चारिरूपा अपि हि लोकतः।
रसोद्बोधे विभावाद्याः कारणान्येव ते मताः।
प्रतीयमानः प्रथमं प्रत्येकं हेतुरुच्यते।
ततः संमिलितः सर्वो विभावादितचेतसाम्।
प्रपानकर्यायाच्चर्व्यमाणो रसो भवेत्। सा. द.३.७-१६

अभिनवभारत्यां, लोचने च यद्वर्णितं तन्निर्यासः काव्यप्रकाशे दर्शितः।

रतिकारणादीनामनुभवादसकृदनुमिता रतिः संस्काररूपेण सहृदयहृदयमधिरोहति, अथ कियता कालेन सुनिपुणमनुष्ठितयोः रामादिव्यक्तिविशेषसम्बन्धिरतिकारणविभावादिप्रतिपादकयोः काव्यनाट्ययोः पूर्वोक्तभावकत्वव्यापारेण रामसीतादिविशेषांशपरिहारेण रतिकारण साधारणकामिनीत्वादिना प्रतीतैः विभावादिभिः सहृदयहृदयावस्थिता सा रतिर्व्यञ्जनया अभिव्यक्ता सामाजिकानाम् आस्वाद्यतामायातीति एतादृशास्वाद एव रसनिष्पत्तिरिति। पूर्वमते असत्या अपि रतेरास्वादः अत्र तु वासन स्थिताया एवेत्यनयोर्भेदः।

एवं रसविचारानुषङ्गिकतया रसस्यालौकिकत्वं, रसभेदः, अलंकार्यो रसः, अलंकारो रस इत्यादयेऽपि विषया विवेचनीयाः। गौरवभिया विरम्यते।

पदरञ्जनी - २२

Dr. N. SRIDHAR,
SAFIC, Pondicherry

(अस्य समीचीनमुत्तरं editorsamskritasri@gmail.com प्रति ई-मैल् कर्तुमपि शक्नुवन्ति। समीचीनोत्तरप्रदातॄणां नामप्रकाशनम् अग्रिमसञ्चिकायाम्।)

1		2		■	3	4		5
	■		■	6	■		■	
7		■	8		9	■	10	
	■	11		■	12	13	■	
■	14		■	15	■	16		■
17	■	18	19	■	20		■	21
22		■	23	24		■	25	
	■	26	■		■	27	■	
28				■	29			

वामतः दक्षिणम्

१. परशुरामस्य पिता (४)

३. पृष्ठमध्यगतास्थिदण्डः (४)

७. दीपकः (२)

८. ब्रह्मा (३)

१०. वाराणसी (२)

११. यः न जानाति सः (२)

१२. पूर्णचन्द्रः, पूर्णिमा (२)

१४. रौद्रम्, उत्कटः (तत्पर्यायवाची संबोधने) (२)

१६. सह (२)

१८. पत्नी (२)

२०. जामाता, पतिः, श्रेष्ठः (२)

२२. रामस्य सहोदरी, दशरथपुत्री (२)

२३. भयोत्पादनम् (३)

२५. दानकर्ता (२)

२८. दुग्धस्य पानम् (४)

२९. मातुः पिता (४)

उपरिष्ठात् अधः

१. जगदाम् ईश्वरः (४)

२. अहङ्कारः (२)

४. भगवान् विष्णुः अस्मिन् शेते (२)

५. कां दिशं यामि इत्याह यः, भयेन पलायितः (४)

६. अमृतम्, पीयूषः (२)

८. प्रवीणः, विशेषेण जानाति (२)

९. नक्षत्रम्, बालिभार्या (२)

११. अग्रे जाता, ज्येष्ठा (३)

१३. सरोवरः (३)

१७. वाराणस्याः अधिष्ठातृदेवी, विशाले अक्षिणी यस्याः (४)

१९. प्रयाणम्,अटनम् (२)

२०. काननम्, अरण्यम् (२)

२१. पितुः पिता (४)

२४. सहचरी (२)

२६. रात्रिः (२)

२७. वल्ली, शाखा (२)

एकाक्षरी

१५. वारणम्, लक्ष्मीः

पदरञ्जनी - २१ (उत्तराणि)

च[1]	मृः		प[2]	व[3]	नः		क[4]	पिः
टुः			क्ष[5]	पा		अ[6]	पा	
	पा[7]	तु[8]	कः		हः[9]		लः	
अ[10]		र		ल[11]		अ[12]		पा[13]
वि[14]	ह[15]	गः		भे		ज[16]	न	ता
मा[17]	सः		कः[18]		धा[19]	न्यम्		लः
र		या[20]		हो[21]	रा		उ[22]	
कम्		त[23]	रा[24]	मः		र[25]	वे	
	जा[26]	ना	ति		रा[27]	मा	य	णम्

पट्टडक्कल्, विरूपाक्षमन्दिरम्

इन्द्रध्वज इवोत्सृष्टः केतुः सर्वधनुष्मताम् ।
धरणीं न स पस्पर्श शरसङ्घैः समावृतः ।।
शरतल्पे महेष्वासं शयानं पुरुषर्षभम् ।
रथात्प्रपतितं चैनं दिव्यो भावः समाविशत् ।।

महाभारतम् ६-११९-९४,९५

Registration with Registrar News Paper of India 30478 / 77

SAMSKRITASRI

मैत्रीं भजताऽखिलहृज्जेत्रीम्
आत्मवदेव परानपि पश्यत ।
युद्धं त्यजत, स्पर्धां त्यजत
त्यजत परेष्वक्रममाक्रमणम्
जननी पृथिवी कामदुघाऽऽस्ते
जनको देवः सकलदयालुः
दाम्यत दत्त दयध्वं जनताः
श्रेयो भूयात्सकलजनानाम् ।।

Printed by: Zigma Graphics, 9/1, Thirtharappan Street, Triplicane - 5
Edited and Published by Sri S. Srinivasa Sarma on behalf of the
Samskrit Education Society (Regd.)
Old 212/13-1, New No. 11, St. Mary's Road, R.A. Puram, Chennai - 600028.